CC-0. Nepal Sanskrit Academy, Kathmandu

संवित्प्रकाशकाव्यम्

श्रीगोविन्दकवीश्वर विरचितम्

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu

श्री ५ माहाराजाधिराज महेन्द्रवीरविक्रमशाहदेवानां
चतुश्चत्वारिंशत्तम शुभजन्मोत्सवावसरे प्रकाशितम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

अस्य ग्रन्थस्य टीका टिप्पण्यादयः पुनर्मुद्रणादयश्च सर्वेऽधिकारा राजकीय-
नियमानुसारेण प्रकाशकाधीनाः

CC-0. Nepal Sanskrit Academy, Kathmandu

पुरातत्त्वप्रकाशनमाला ११

प्रथमं संस्करणम् १०००

संवित्प्रकाशकाव्यम्

श्रीगोविन्दकवीश्वर विरचितम्

अधिकारीत्युपाह्व शंकरनाथ शर्मणः का. मु. अध्यक्षतायाम्
ज्योतिषाचार्य पण्डित देवीप्रसाद लंसालेन संपादितम्

श्री ५ सर्वकारस्य
पुरातत्त्व तथा संस्कृतिविभागान्तर्गत
नेपालराष्ट्रियपुस्तकालयतः प्रकाशितम्

संवत् २०२० ज्येष्ठ २८

मूल्यम् १।२५

CC-0. Nepal Sanskrit Academy, Kathmandu

भूमिका

भो सहृदयास्तत्तदनेकविषयरत्नप्रकरप्रकीर्णा ज्योतिःशास्त्रपारावारो दुर्विगाहः सहसाल्पधियाम् । तत्तल्स्पर्शिभिर्भृग्वादिभिर्महर्षिभिः सर्वसाधारणजनसौकर्यार्थं मुद्धृत्योद्धृत्य विषयरत्नानि संहितासूपन्यस्तानि । तथापि कालप्रवाहेण दुर्निवारेण विप्लवानीत स्ततः सङ्कीर्णानि विलीनानीव दौर्भाग्यात् । इत्यवलोक्य गुरुजनचरणलब्धप्रसादै र्विरलैर्भाविुकै र्जातक ग्रहगणित शकुन कर्मविपाक प्रश्नशास्त्राणि पुनः उद्दङ्कितानि । तेष्वेयं संवित्प्रकाशकाव्यं प्रश्नग्रन्थरूपंकालनिर्णयशैल्यां श्रीगोविन्दकवीश्वरेण विरचितन् । प्रश्न जिज्ञासूनां कृतेऽतीवोपयुक्तमिति मत्वा यथा मति संशोध्य नेपालराष्ट्रियपुस्तकालयतः प्रकाशितम् । अवश्यं सहृदयाह्लादकरं लब्ध प्रचारञ्च भविष्यतीत्याशाऽऽस्तेऽयं जनः । तदत्र सहायकर्ता पं. यज्ञानन्द गुभाजु धन्यवादार्हः ।

विनीतः

पण्डित देवीप्रसाद लंसालः

CC-0. Nepal Sanskrit Academy, Kathmandu

विचार

श्री ५ को सरकार, पुरातत्व र संस्कृति विभाग अन्तरगतको सिंहदरबार स्थित नेपाल राष्ट्रियपुस्तकालयद्वारा 'संवित्प्रकाशकाव्य' लाई प्रकाशनमा ल्याएर निकै सामयिक र उपयोगी कदम चालेको छ । मानव जीवनमा विभिन्न विश्वास र विचारधाराहरुले सामाजिक मान्यता पाएका हुन्छन् । व्यक्ति र समाजको सामञ्जस्य पूर्ण समर्थनमा तिन्को क्रमिक विकास हुदै जान्छ । यसै विश्लेषण अन्तरगत ज्योतिष विज्ञानको अध्ययन सामाजिक समर्थन, उपयोगिता र युगानुकूल आवश्यकता बारे अन्दाज काढन सकिन्छ । निश्चय नै मनुष्यकालागि यस विज्ञानको पनि निकै खांचो थियो र आज सम्मपनि यस्को प्रयोजनलाई होच्याउन सकिन्न । प्रस्तुत पुस्तकमा प्रथमदेखि लिएर चौधौं सर्ग अन्तरगत विभिन्न लोकोपयोगि कुराहरुको वर्णन गरिएका छन् । जस्तो प्रथम सर्गमा ग्रहहरुको राजतापसादि संज्ञा र भूत वर्तमान कालज्ञानको वर्णन छ । द्वितीय सर्गमा मनका कुरा भोजन गरें नगरेको कति पटक आफ्नो घरमा अथवा अर्काका घरमा गरेको र कस्तो पदार्थ खाएको भन्ने प्रश्नको उत्तर छ । तृतीय सर्गहरूमा गर्भ सम्बन्धी प्रश्नको उत्तर, यात्रा वर्णन खानी संबंधी प्रश्नको उत्तर, रोग सम्बन्धी विचार शत्रुको आक्रमण त्यस्बाट जय पराजय सम्बन्धी वर्णन, डुङ्गाबाट गरिने यात्राबाट लाभ र हानि आदि कतिपय विचारहरूको वर्णन छ जुन निकै उपयोगि छन् । ज्योतिषमा यस्तो पुस्तक खासगरि ज्योतिषमा काव्य नाम भएको पुस्तक पुराना विद्वानहरुले पनि यस्तो नाम सुनेको छैन भन्दछन् र ५७—५८ सन् सम्ममा छापिएका ज्योतिष शास्त्रका इतिहासमा गोविन्दकवीश्वर र उन्को संवित्प्रकाशकाव्यको नाम दिन सकेको छैनन् पुरातत्त्व प्रकाशन मालाको तेह्रौं अंक प्रकाशित गर्न मेहनत गर्नु भएका सबै कर्मचारीहरूलाई र श्री देवीप्रसाद लंसाललाई विशेष धन्यवाद दिन्छु ।

रमेशजंग थापा
निर्देशक
श्री ५ को सरकार
पुरातत्त्व र संस्कृति विभाग

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu

संवित्प्रकाशकाव्यान्तर्गत विषयस्थानुक्रमणिका

प्रथमः सर्गः

	पृष्ठसं.	श्लोकसं.
मङ्गलाचरणम्	१	१
प्रभकर्तृवशात्फलाफलम्	१	३
शास्त्रप्रसंशाकार्यक्रमं च	१	४
अधिष्ठातृग्रहवशात्षट्प्रश्ना	२	६
ग्रहाणां जलचरादिसंज्ञा	३	२
प्रातर्मध्यान्हदिसंज्ञा	३	,,
तीर्यगूर्ध्वादिदृष्टिसंज्ञा	३	,,
दिङ्मुखरसादिसंज्ञा	३	३
द्विपदादिसंज्ञा	३	४
स्वर्गादिलोकसंज्ञा	३	५
नृपामात्यादिसंज्ञा	३	,,
सरस–शुष्क-शिशु-कुमारादिसंज्ञा	४	६
राजतापसविप्रादि-संज्ञा	४	७
देव-पश्वादि–भूमि संज्ञा	४	७
तत्त्वादि–भाववशाच्चिन्तितकर्माणि	४	८
१।२।१२ भावाद् भूतभविष्यद्वर्तमानकालज्ञानम्		२३

द्वितीयः सर्गः

प्रष्टुः स्पर्शनदर्शनाच्च धात्वादिविचारः	५	१
राशिवशाद्ग्रहवशाच्च धात्वादिविचारः	५	२
नवांशकवशाद्ग्रहस्थानवशाच्च धात्वादिविचारः	६	४
मम मनसि किमिति प्रश्ने	६	५
कीदृशस्त्रीभोगो मया कृतेति प्रश्ने	६	७
ममविलोकीदृश्यङ्गनेति प्रश्ने	६	९
भोजनचिन्ता	७	०
क्षारादिभोजनप्रश्ने	७	»

CC-0. Nepal Sanskrit Academy, Kathmandu

संवित्प्रकाशकाव्यान्तर्गत विषयस्यानुक्रमणिका

	पृष्ठसंख्या	श्लोकसं०
परगृहे भोजनं न वेति	७	११
ससन्ताप-रसमांसादि-भोजनविचारः	७	,,
षड्रसभोजनादिप्रश्ने	७	१२
सस्नेहनिस्नेहादि-भोजनप्रश्ने	७	१३
ग्रहवशाद्भिन्नज्ञानम्	७	१३
लग्नचन्द्रवशाद्वर्कादिवारभोजनज्ञानम्	७	१४
भावस्वामीवशाद्भुक्ताभुक्तज्ञानम्	७	१५
ग्रह वशाच्छुभाशुभ ज्ञानम्	८	१६
तृतीयः सर्गः		
प्रश्ने भावफलविचारः	८	१
पूर्णार्द्ध पादफलज्ञानम्	८	२
लग्नेशकार्येशवशादन्यग्रहवशाच्च फलज्ञानम्	९	६-११
लग्नेशव्ययेशवशाद्धन्धनज्ञानम्	१०	१२
भावक्षय-वृद्ध्यादिविचारः	१०	१३
लग्नेशाष्टमेशवशादपि	१०	,,
लग्नेशसुतेशात्पुत्राप्तिः	१०	१४
लग्नेशधनेशाद्धनप्राप्तिः	१०	१५
लग्नांशकवशात्सुखासुखम्	१०	१६
भाववशात्फलज्ञानम्	१०	१७
भावाधिफलं शुभाशुभं च	११	१८-१९
फलस्य भावाभावफलम्	११	२०-२२
कार्यसिद्धासिद्धज्ञानम्	११	२३
शीघ्रनष्टप्राप्तिज्ञानम्	१२	२४
चौरेण हृतधनस्यप्राप्तिज्ञानम्	१२	२५
राज्यशुभफलाप्तिज्ञानम्	१२	२७-२८

CC-0. Nepal Sanskrit Academy, Kathmandu

संवित्प्रकाशकाल्पान्तर्गत विषयस्थानुक्रमणिका

तृतीयःसर्गः	पृष्ठसं	श्लोकसं
अल्पजयलाभज्ञानम्	१२	२६
शुभाशुभस्त्रीप्राप्तिज्ञानम्	१२-१३	३२-३३
इष्टार्थसिद्धिज्ञानम्	१३	३४
लग्नादिवशादर्थाप्तिज्ञानम्	१३	३५
ग्रहवशाच्छुभाशुभज्ञानम्	१३	३६
राज्याप्तिपदाप्तिज्ञानम्	१३	३७-३८
अर्थानर्थयोगः	१३	३९-४१
सर्वार्थगर्भयोगः	१४	४२
तात्कालिकसिद्धयसिद्धिज्ञानम्	१४	४३-४५
ऐहिकामुष्मिकसदसद्व्ययज्ञानम्	१४	४६
लग्न चन्द्रादर्थाप्तियोगः	१४	४७
प्राक्कर्मैव दैवज्ञं कृच्छति	१४	४८
प्रष्टु रङ्गस्पर्शात्फलकथनम्	१५	४९

चतुर्थ सर्गः		
स्थानदृष्टिवशाद्वाविवाह योगः	१५	१
लग्नांशकबलाद्दृष्टितश्च विवाहयोगः	१५	२
स्त्रीप्राप्तियोगः	१६	५-७
ग्रहवशात्स्त्रीपुंसोः प्रियाप्रिययोगः	१६	८-९
जन्मलग्नवशादन्यस्त्रियै धनदोयोगः, पुनर्जाराय धनदोयोगः स्वस्त्रीपुंसोर्भोग्य-धनयोगश्च	१७	१०
पुंश्चलीदुर्भगादियोगाः	१७	११
४।९ स्थानवशात्संगृहीतोद्वाहितादियोगः	१७	१२
ग्रहवशाच्छुद्धा परभोग्या च	१७	१३-१५
दुर्भगारण्डाविषकन्यका योगश्च	१८	१६
इष्टकन्या-बहुकन्या-प्राप्तियोगः सा हीनजाती या स्वजाती या वा	१८	१७-१८
जायेशादग्रहवशाच्च व्यभिचारिणीपुनर्भवादियोगाः	१८	१८

CC-0. Nepal Sanskrit Academy, Kathmandu

संवित्प्रकाशकाव्यान्तर्गत विषयस्यानुक्रमणिका

चतुर्थः सर्गः	पृष्ठसं	श्लोकसं
स्त्रीमरण-स्त्रीवियोग-विकलदारादियोगः	१८	१६-२३
अग्नि-पाशादि-स्त्रीमरण योगः	१८	२४

पञ्चमः सर्गः

लग्नेश-सुतेश-ग्रहवशाच्च गर्भसंभवज्ञानम्, लग्नराशि-वशाच्च गर्भसंभवज्ञानम्	१६	१-६
गर्भासंभव-गर्भस्रावप्रकारसंज्ञावर्णनम्	१६	७-८
चिरात्पुत्राप्तियोगः	१६	६
पुत्रकन्याजन्मयोगः	२०	१०-१२
पुत्रकन्याजन्मकालज्ञानम्	२०	१३-१४
यमल तथा गर्भमासज्ञानम्	२१	१५
प्रसवकाल (दिवारात्रिसंध्यादि) ज्ञानम्	२१	१६-१७
इष्टानिष्टप्रसवज्ञानम्	२१	१८
जारजयोगः	२१	१६-२०
औरसपुत्रयोगः	२१	२१
भौमात्पुत्रनाशः शुक्रात्कन्यासंख्या	२१	२२-२३
वंशवृद्धिकारकयोगः	२२	२४
वंध्यापतियोगः	२२	२५
शिवदर्शनात्पुत्राप्तिः	२२	२६
बहसुतोपायो महिमा च	२२	२७-२६

षष्ठः सर्गः

४।१० स्थानवशाद्गमागमयोगः	२३	१
लग्नचन्द्रवशाच्च गमागमयोगः	२३	२-८
यात्राध्वनिर्विघ्नकारकाः	२३-२४	६-१२
अष्टमस्थग्रहवशाच्चौरसंख्याज्ञानम्	२४	१३
ग्रहवशाद्वर्त्मनि शुभाशुभज्ञानम्	२४	१४
शुक्रस्थितराशिवशात्पथिकस्य स्त्रीभोगसुखादि विचारः	२४	१५

CC-0. Nepal Sanskrit Academy, Kathmandu

संवित्प्रकाशकाव्यान्तर्गत विषयस्यानुक्रमणिका

षष्ठः सर्गः	पृष्ठस	श्लोकस
चरादिराशिग्रहवशाच्च विश्रामादिविचारः	२५	१६-१७
चन्द्रसूर्यवशाद्गुणस्य मृत्युज्ञानम्	२५	१८
१।४ स्थग्रहवशाद्रणे राज्ञोविचारः	२५	२०-२३
समरेऽमात्यपदाप्तिसिद्धियोगः	२५	२४
कार्यभङ्गोमृत्युयोगश्च	२६	२५
कार्यभङ्गमन्त्रिनाशकयोगः	२६	२६
राजपुत्रनाशकयोगः	२६	२७
स्त्रीनिमित्तादर्थलाभयोगः	२६	२८-२९
मार्गावरोधः शुभागमनं च	२६-२७	३०-३२
पथिकस्य द्रव्यागमयोगः	२७	३३
पथिकस्य शस्त्राघातः प्रस्थितज्ञानं च	२७	३४
वर्त्मन्युपद्रवज्ञानं मृत्युज्ञानं च	२७	३५
शुभागमनशीघ्रागमनज्ञानं च	२७	३६
परैःसहलाभयुक्ताद्यागमनम्	२७	३७-३९
यातुःस्वगृहागमन मासदिनज्ञानम्	२८	४०-४३
यातुर्नैवागमनं बन्धनज्ञानं च	२८	४४-४५
चौरबलंबन्धनमोक्षज्ञानं च	२८	४६-४८
सूर्यचन्द्रवशाद्वृष्टिविचारः	२९	१
करकादिवृष्टिविचारः	२९	२
सप्तविंशतिदिने वृष्टिकथनम्	२९	३
जलराशि संज्ञकग्रहाद्वर्षणम्	२९	४
बुधग्रहादल्पबहुवृष्टिः	२९	५
ग्रहाराशिवशाद्वृष्टिविचारः	२९-३०	६-७
राशिग्रहवशाद्वृष्टिर्गर्जनं च	३०	८
वृष्टिसमयज्ञानम्	३०	९
सूर्यराशीवशाद्वृष्टिविचारः	३०	१०

CC-0. Nepal Sanskrit Academy, Kathmandu

संवित्प्रकाशकाव्यान्तर्गत विषयस्यानुक्रमणिका

सप्तमः सर्गः	पृष्ठसं	श्लोकसं
काकनीडवशात्प्रचुराऽल्पवृष्टिदुर्भिक्षादिविचारः	३०	११-१३
आषाढकृष्णचतुर्थ्यामजैकपादनक्षत्रे मेघावरण फलम्	३०	१४
आषाढशुक्लसप्तम्यां सूर्यचन्द्ररश्मितो वृष्टिज्ञानम्	३१	१५
वैशाखशुक्ल तृतीया वैशाखकृष्णामायां मेघावरण फलम्	३१	१६
आषाढशुक्लप्रतिपदि पुनर्वसोर्यावद्वृक्ति स्तावती -- प्रावृषि वर्षणम्	३१	१७
चित्रास्वाती विशाखासु यस्मिन्मासे न वर्षति तन्मासे मेघो उज्ज्वला इति गर्गोक्तिः	३१	१८
भौमसञ्चारक्षाद्वृष्टिघातयोगः	३१	१९
शाके २ ×३ + २÷४ फलं समेऽधिकवृष्टिर्विषमेऽल्पम्	३१	२०
वर्षाङ्गाद्दिवसस्वामि राशिग्रहवशात्सुभिक्षदुर्भिक्षादि— ज्ञानम्	३१	२१-२३

अष्टमः सर्गः

प्रश्नाङ्गात्तुर्यान्निधिविचारः	३२	१
तुर्याच्छुक्राच्च निधेर्द्रव्यज्ञानम्	३२	२
स्वपूर्वजानां परेषां च द्रव्यज्ञानम्	३२	३
सुलभदुर्लभवह्वाल्पत्वं च मिधे पृजना द्भतति	३२	४
१।४ स्थानवशादन्यग्रहवशाच्च निधिस्थान वर्णनं — प्राप्तिवर्णनञ्च	३२-३३	५-६
निधिनाशोऽप्राप्तिश्च	३३	७-९
शल्यज्ञानम्	३३	१०

नवमः सर्गः

लग्नचन्द्रराशिवशाद्दिपोरागमनम्	३४	१
मार्गे रिपुगुप्तबलज्ञानम्	३४	२
सत्वरमेव शत्रु निवृत्ति ज्ञानम्	३४	३
दैवात्पथि शत्रुमरणज्ञानम्	३४	४
रिपोर्निवृत्तिज्ञानम्	३४	५

CC-0. Nepal Sanskrit Academy, Kathmandu

संवित्प्रकाशकाव्योन्तर्गत विषयस्यानुक्रमणिका

नवमः सर्गः	पृष्ठसं	श्लोकसं
मार्गमध्याच्छत्रोर्घिनिवर्तनम	२४	६
द्रागेव शत्रोरागमनविचारः	३४	७
शत्रुपलायनविचारः	३४	८
शत्रुर्नैवायातीति विचारः	३४	९
शत्रोरागमनादिविचारः	३४	१०
१।४ स्थानवशाच्छत्रोरागमनादिविचारः	३५	११
लग्नाच्चन्द्राच्च शत्रोरागमनादिविचारः	३५	१२
यायिस्थायिपुरेशपौरसंज्ञा	३५	१३
तस्माज्जय पराजयौ ग्रहवशात्स्थानवशाच्च	३५ ३६	१४-१४
१ । ६ । ७ स्थानवशात्कलिज्ञानम्	३६	२५
१।७ स्थानेशवशदाद्रण सभंव	३६	२६-२७
दुर्गप्रश्ने भङ्गाभङ्गविचारः	३६-३७	२८-३१
अस्त्रादिदुर्गज्ञानम्	३७	३२-३४
लग्ने क्रूरग्रहश्रैष्ठ्यम्	३७	३५
दुर्गस्थानां निह्वालादिज्ञानम्	३७-३८	३६-३७
सकलादिसिद्धिज्ञानम्	३८	४२-४४
दण्डकरादिज्ञानम्	३८-३९	४५-४८

दशमः सर्गः

चन्द्रवशाद्रोगिज्ञानम्	३९	१
भौमचन्द्रवशाद्रोगिज्ञानम्	३९	२
अन्यग्रहराशिवशाद्रोगिज्ञानम्	४०-४१	३-११
मृत्युदिनज्ञानम्	४१	१२-१४
स्थानग्रहवशाद्दोषज्ञानम्	४१	१५-१६
प्रत्येकग्रहवशाद्दोषज्ञानम्	४१	१७
रुजां सम्बन्धे नितिज्ञज्ञानम्	४२	१८-२०
वैद्यरोगौषधसंज्ञा	४२	२१

CC-0. Nepal Sanskrit Academy, Kathmandu

संवित्प्रकाशकाव्यान्तर्गत विषयस्यानुक्रमणिका

एकादशः सर्गः

	पृष्ठस०	श्लोकस०
चोरितवस्तुपतिसंज्ञा	४२	१
हिताहितसिद्धासिद्धिज्ञानम्	४२	२
सुलभदुर्लभ विस्मृतादि ज्ञानम्	४२-४३	३ १०
चोरितवस्तूनां वार्तापि नश्रुयत इतियोग :	४३	११
अन्तिके स्वगृहे वा चौरज्ञानम्	४४	१२
स्वजनः परजनो वा चौर इतिज्ञानम्	४४	१३-१४
सप्तमेशाद्गृहप्रत्यादिचौर्यज्ञानम्	४४	१५
लग्नवशान्नष्ट वस्तुनः स्थितिज्ञानम्	४४	१६
लग्नवशाच्च दिग्योजनादिज्ञानन्	४४	१७
लग्नांशकद्रेकाणवशाच्चोरितद्रव्यस्वरूपादिज्ञानन्	४४	१८
चन्द्रादग्न्यम्बुभूवायुराशिवशादिदग्ज्ञानम्	४५	१९
ग्रहवशान्नष्टवस्तु ज्ञानम्	४५	२०
मिथुनर्क्षांशंस्थराहुवशाद्विविध वस्तु ज्ञानम्	४५	२१

द्वादशः सर्गः

केन्द्रात्तरन्याङ्गविभागज्ञानम्	४५	१
नौकायालाभादिविचारः	४५	२
तर्याङ्गादिविचारः	४५-४६	३-७
तर्याधामदक्षाद्यङ्गविभागज्ञानम	४६	८
भावाच्छुभाशुभलाभादिज्ञानम्अरिचौरादिभयज्ञानच	४६-४७	९-१७
चौर भङ्गादिविज्ञानम्	४७	१८
नौका जले स्थले वा स्थितेतिज्ञानम्	४७	१९-२०
नौकामंगादिविचारः	४७-४८	२१-२७
तरीनिवासे सत्वरमायातीति ज्ञानम्	४८	२८-२९
चौरर्मुषितयोगः (यवनाचार्यगतानुरूपः)	४८	३०
तरण्यां मज्जनादि योगः	४८	३१-३२
पोतपतेर्मृत्युविचारः	४८	३३

CC-0. Nepal Sanskrit Academy, Kathmandu

संवित्प्रकाशकाव्यान्तर्गत विषयस्थानुक्रमणिका

द्वादशः सर्गः	पृष्ठसंख्या	श्लोकसं
पोतमज्जनं लाभादि विचारश्च	४८	३४
लग्नग्रहवशाच्च लाभालाभज्ञानम्	४९	३५-३६

त्रयोदशः सर्गः

क्रेतृविक्रेत्रादिसंज्ञा लाभालाभौश्च	४९	१
१।२ स्थानवशात्समर्घमहर्घादिज्ञानम्	४९	२
लग्नवशात्क्रयादिविचारः	४९	३- ४
सूर्यसंक्रान्त्यर्क्षाल्लाभलाभेशयोश्च समर्घमहर्घज्ञानम्	५०	५– ६
वर्षलग्नवर्षेशज्ञानम्	५०	७
ताभ्यां समर्घादिविचारः	५०	८
राशिवशाद्राशिवस्तूनां समर्घादिज्ञानम्	५०	९
चन्द्रार्कस्थानवशाद्द्रव्यादिज्ञानम्	५०	१०-११
जघन्यादिऋक्षसंज्ञा, तस्मिन्नुदितचन्द्रफलम्	५०	१२-१३
सूर्यसंक्रमान्मुहूर्त्तफलम्	५१	१४-१५
नामर्क्षात्पूर्णिमाफलम्	५१	१६
अमार्कवारपञ्चार्कवारफलम्	५१	१७
वस्तूनां स्वामी सूर्यस्यालि वृषप्रवेशश्च	५१	१८-२०
सूर्यस्यालिप्रवेशे धान्यार्घादिज्ञानम्	५१-५२	२१–२८
वृषप्रवेशे वृष्ट्यदिविचारः	५२	२९-३२
राशिवशाद्वस्तूनामधिपाः	५२-५३	३४-४३
बुधगुरुवशाद्वस्तूनां वृद्धियोगः	५३	४४
शुक्र-पाप-ग्रहवशाच्च	५३-५४	४५४८
पक्षान्तेऽुत्पातादिविचारः	५४	४९
वस्तूनां संग्रहणाल्लाभादिज्ञानम्	५४-५५	५०–५७

CC-0. Nepal Sanskrit Academy, Kathmandu

संवित्प्रकाशकाव्यान्तर्गत - विषयानुक्रमणिका

चतुर्दशः सर्गः

	पृष्ठसं	श्लोकसं
कलहे विना वादिनोविजयः	५५	१
आशुप्रहारयोगः	५५	२
१।७ स्थानाधिपवशाद्वादिप्रसिवादिसंज्ञा	५६	३
जनश्रुतिसत्यासत्यविचारः	५६	४
मिलनप्रश्ने समीपदूरज्ञानम्	५६	५
वासस्थाने सुखासुखविचारः	५६	६
सेवाप्रश्ने सुखासुखविचारः	५६	७
दिनचर्चायां सुखासुखविचारः	५६	८
चन्द्रवशात्सुखासुखज्ञानम्	५६	९–१०
चन्द्रयोगग्रहाद्रोगाःमृत्युज्ञानम्	५६	११
ग्रन्थकर्तुः स्थानादिवर्णनम्	५७	१२

CC-0. Nepal Sanskrit Academy, Kathmandu

श्री

संवित्प्रकाशकाव्यम्

श्रीगणेशायनमः

श्रीमद्विष्णुमशेषशक्तिमखिलंकलयं किरीटाङ्गद
द्योतत्कुण्डलमुद्यदर्करुचिरं पीताम्बरं हारिणम्।
पद्मस्थंहृदयस्थकौस्तुभमणिंहस्तस्थचक्रोल्लस
च्छङ्खाम्भोजगदं मुदंविदधतं भक्तै[1] भजेऽभीष्टदम् ॥१॥

पृच्छातन्त्रमनेकमाद्यमहितातन्त्रोल्लसद्धीधरै-
र्धीरैर्धर्मपरैर्विनिर्मितमहं विज्ञाय सुज्ञार्थितः।
कुर्वे सत्करुणापरः परकृते संवित्प्रकाशं परं
प्रोक्ताशेषसमाह्वयादिकमुपादाय प्रसिद्ध्याऽऽद्भुतः ॥२॥

मुक्ताविद्रुमरत्नहारकनकोपेतोत्तमक्षौमयुक्
सत्पुष्पप्रकराक्षतार्तवफलैस्तद्राशिचक्रं मुदा।
श्रद्धाभक्तिसमन्वितो विकपटः संपूज्य पूजोचितं
दैवज्ञं विविधार्हणादिमुदितं पृच्छेन्निजाभीप्सितम् ॥३॥

यः पृच्छेत्कुहकान्वितोऽनृजुमतिः श्रद्धाविनत्यादरै
स्त्यक्तोरिक्तकरः प्रसंगवसता हास्याच्चना[2]त्यर्थवान्।
दैव[3]ज्ञानचणं चमत्कृतिकरं प्रश्नोत्तरा कीर्तने
सक्तान्तः करणं लभेत स नहि प्रश्नस्य किञ्चित्फलम् ॥४॥

अप्रत्यक्षमिहान्यशास्त्रगदितं केऽप्यत्र न प्रत्ययो
वादः केवलमत्र तत्र च मिथः सर्वे विरुद्धोक्तयः।
ज्योतिः शास्त्रमदो वदन्त्यवितथं दृष्टः प्रमाणं मिथो
वक्तारो नविरूद्धबुद्धय इदं स्वाध्यायचक्षुः किल ॥५॥

---

१ भक्तया पा। २ नातिप्रयोनजवान् । ३निपुणम्।

CC-0. Nepal Sanskrit Academy, Kathmandu

संवित्प्रकाशकाव्यम्

मूर्तिर्[1]मूर्तिमतां मता किल जनुः प्रश्नादिलग्नं बुधै-
र्नैर्बल्येऽस्य मता तनुस्तनुमतामिन्द्वाश्रितं मन्दिरम् ।
यस्मादिन्दुगृहं मनो निगदितं मूर्तिर्द्वितीया मनः
प्राधान्यं हि मनोमयस्य वपुषः प्रायो न पिण्डा[2]त्मनः ॥६॥

हेरासारमशेषसारसमयं ज्ञात्वा मया निर्मितं
तत्तद्वैवविदीरितानि करणान्यालोक्य वा दैववित् ।
कृत्वा स्पष्टतरान्विलग्नसहितानादित्यमुख्यान्ग्रहान्
यद्यद्वक्तिवचः समाहितमनास्तत्तद्भवेद्वेदवत् ॥७॥

सद्विद्यां न वदेत्कदाप्यनृजवेऽसूयान्विताया हि[3]ता
ये त्याह श्रुतिरार्यशासनपरा विद्याहवै ब्राह्मणम् ।
इत्याज्ञाततईदृशा परिहरेदन्यंस्तुतां ग्राहयेत्
नित्यं यः प्रियकृन्नवात्रशपथैरूत्पादितप्रत्ययम् ॥८।

[4]प्रश्नः स्यात्प्रथमोविलग्नभवनाज्ज्ञेयो द्वितीयो निशा
[5]धीशाधिष्ठितराशितोऽथ मिहिरात्प्रश्नस्तृतीयो मतः ।
[6]तूर्यः शक्रपुरोहिताश्रितगृहाच्चेन्नैषनीचास्तगो
वक्रांचेद्गतिमाश्रितः सुरगुरुः स्यात्तर्हिवक्रालयात् ॥९॥

प्रश्नः पञ्चम इन्दुनन्दनमहीसूनूशनःसूर्जितम्
वीर्यं यस्य भवेदमुष्य गृहतोऽमीचेत्त्रयो निर्बलाः ।
तर्हीनात्मजराशितः शनिरपिस्यान्निर्बलश्चेत्तदा
शुक्रक्ष्मासुतसोमसूनुषु बलं यस्याधिकं तद्गृहात् ॥१०॥

---

१ शरीरमयो मनोमय आत्मामय स्तत्र शरीरमयंलग्नं मनोनयंचन्द्रलग्नं आत्मामयं सूर्यलग्नम् । २ अतः पिण्डात्मनो वपुषः प्राधान्यं मनोमय वपुषो, यद्यपि ताभ्यामात्मायस्य प्राधान्यं तथापि अकिञ्चिकरत्वात्केवलं तस्य साक्षि रुपता । ३ गुणेषु दोषाविष्कृतिः ।४ लग्नेन्दुर्कभतः प्रोक्तास्त्रिप्रश्नः पूर्वसूरिभिः । ५ अधिष्ठितशब्दस्यानु वर्तनं द्वादशसु प्रश्नेषु ६ तुर्यो जीवोयदानीचोऽस्तगो वक्रगतोगुरुः । तदा भौमः पञ्चमस्तु भौमःसौम्योशनःसु यः ॥ वलधाँ स्तद्गृहात्सर्वे निर्वलाश्चेच्छनेर्गृहात् । निर्वल सोऽपि चेत्पूर्वोदितानां यो वलाधिकः ॥ तस्मात्षष्ठस्तु तेषां यावच्छिष्टावुभौ तयोः । यो बली तद्गृहा ज्ज्ञेयः षट् प्रश्ना ईरिता इति ॥ तत्तद्वितीय भवनाच्छेषाः षट्द्वा दशैव ते, इति द्वादशप्रश्नाः । द्वादशेत्युपलक्षणं तत्तद्द्वितीयादित्यत स्तेभ्यस्तेभ्यश्च द्वितीया ये गृहास्तेभ्य इत्यर्थः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

प्रथमः सर्गः

षष्ठं प्रश्नमुशन्ति चित्रकविकुन्तेषु स्तोऽवशिष्टावुभौ
यो खेटाचनयोर्वलेन बहुना यः संयुत स्तस्य भात् ।
षट् प्रश्ना इति संभवन्त्यथ परे तत्तद्द्वितीयाद्गृहात्
प्रश्नाः षट्गणकोत्तमैर्निगदिताः प्रश्ना इति द्वादश ॥११॥

शुक्रेन्दू जलचारिणौ बुधगुरू ग्राम्यौ तमोऽर्कार्कजं
क्ष्मापुत्रा वनचारिणोऽथ सबुधो जीवः प्रभातं मतः ।
मध्याह्नः कुजभास्करौ शशियुतः शुक्रोपराह्नः स्मृतः
सन्ध्या राहु शनी-अथो बुधकवी तीर्यक्[1]द्रुशावीरितौ ॥१२॥

ऊर्ध्वं पश्यत आरवासरमणी राह्वर्कपुत्रावधः
सोमेज्यौ समदर्शिनावथभृगुर्भानुश्च पूर्वाननौ ।
चान्द्रीज्यावुदगाननौ वरूणदिक्वक्त्रौशशीनात्मजौ
याम्याशावदनौ विधुन्तुदकुजौ जीवस्तु मिष्टं भजेत् ॥१३॥

भौमार्कौ कटुकं, बुधस्तु [2]तुवरं दैत्यार्चितोऽम्लं शशी
क्षारं, पातशनी तु तीक्ष्णकमथो देवेन्द्र दैत्यार्चितौ ।
विज्ञेयौ द्विपदौ शनीन्दुतनयौ प्रोक्तौ पतङ्गौ रविः
क्ष्मापुत्रौ तु चतुष्पदावथतमश्चन्द्रावुरः सर्पिणौ ॥१४॥

स्वर्लोकं बुधजीवयोर्नरजगच्चन्द्रार्कयोरादिशेत्
नागौकोऽन्यखगेषु चिन्तित लुका मुष्टयादिषु स्यादिह ।
भूपोऽर्के महिषी विधौ विदिकुमारो, मण्डलेशः कुजे
जीवेस्यात्सचिवो भृगौपरिवृढ स्याच्छेषयोः सेवकः ॥१५॥

शुक्रेन्दू सजलौ विनार्कज कुजाः शुष्का बुधेज्यौगृहे
[4]सांबुन्यंबुयुतावनम्बुनि मतौ तावंभसा वर्जितौ
माहेयस्तरुणः शिशुः शशिसुतः शितांशु शुक्रौ समौ
स्वर्भान्वंगिरसार्यमार्यमसुतान्वर्षीय सो मन्यते ॥१६॥

---

१ केकरौ। २ कषाय। ३ गणनायकः ४ साम्बुनिगृहे बुधेज्यौ अम्बुयुतौ अनम्बुनिगृहेऽभसावर्जिता वित्यर्थः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

सवित्प्रकाशकाव्यम्

भूपेऽर्को हिमगुस्तु तापस इलापुत्रः कलादो[1] बुधो
भूदेवो विषणे वणिक्भृगुसुतो वैश्यः शनिर्वार्षलः[2]।
शुक्रेन्दौ जलभू रवौ तु पशुभूर्भौमेऽग्निभूर्भूर्बुधे
जीवेदैवतभूः शनौ [3]वरिरिदं नष्टास्पदं तुर्यगात् ॥१७॥

जात्यायुः सुखदुःख गेहतनुगावस्थांकवर्णादिकम्
लग्ने ज्ञेयमथो धने तु कनकाद्यं रत्नमुक्तादि च।
विक्रे यादिकवस्त्वथः सहजभाद्भ्रात्रादिभृत्योद्यमाः
तुर्ये भ्रातृसुहृन्निकेतनसुखादिस्थान वृद्धयादि च ॥१८॥

क्षेत्रारामगमागमौषधनिधि [4]श्वभ्रप्रवेशाः खले
ग्रामादीन्यथ पञ्चमे सुतसुताधीगद्यपद्यादिकम्।
मन्त्राराधनशिष्यवाक्प्रभृतिचाथो वैरिभे मातुला
[4]तंकारा व्यभिचारयुद्धमहिषीधेनूष्ट्रभीत्यादि च ॥१९॥

विज्ञेयं स्मरभे गमागमविवाहाद्यं गनासोदरा-
पत्ययुद्धवणिक् क्रियाव्यवहृतिश्चाप्यष्टमे चिन्तयेत्।
संग्रामाभयनष्टदृष्टपदवी वैषम्यदुर्गोदको-
त्तारच्छिद्रसपत्नसंकटविपद्दुः काल धर्मादि च ॥२०॥

धर्मे धर्मजलाशयामरगृहक्ष्मादेवगेहप्रपा
दीक्षासत्रमठादितीर्थगमनं चाथो नभो भावतः।
आकाशान्वयिवर्षणादि च पुरं मुद्रानिमित्तादिकम्
सत्कर्मोचितसिद्धयः शुभपदं राज्यादिपित्रादिकम् ॥२१॥

पश्येल्लाभगृहात्तु रङ्गमरथस्तंवेरमैन्द्रादिकं
यानंसस्यसुवर्णवस्त्रललना विद्यार्थलाभादि च।
प्रव्रू यादुव्ययभावतो वितरणोद्वाहाद्यभीष्टक्रिया
भोगोद्याननिपानकर्षणगृहाद्यैसद्व्यया सद्व्ययौ ॥२२॥

---

१ स्वर्णकारः २ अन्त्यज पा। ३ क्षित्युत्करः ४ रोगः

CC-0. Nepal Sanskrit Academy, Kathmandu

द्वितीयः सर्गः

भावेभ्योऽप्यखिलेभ्य एवमखिलान्भावान्प्रकल्प्यादिशेत्
भावानामपि सर्वभावजफलानीष्टानिन्यष्टानि च ।
प्रष्टुस्तत्समयोद्भवंफलमुदाहार्यं विलग्नाद्बुधै-
र्यच्चातीतफलं तदन्त्यभवनादेष्यं तु तद्वित्तभात् ॥२३॥

इतिकाह्नकवीश्वरनन्दन गोविन्दकवीश्वरेणनीर्णीते ।
संवित्प्रकाशकाव्ये प्रथमसर्गो भवेद्भव्यः ॥

द्वितीयः सर्गः

अथ धात्वादिचिन्ता

ऊर्ध्वं पश्यति पृच्छके प्रणिणदेज्जीवाश्रयं चिन्तनम्
मध्यं पश्यति धातुसंश्रयमधो दृश्यत्रमूलाश्रयम् ।
ऊर्ध्वाङ्गं यदि संस्पृशेद्वद तदा जीवस्य चिन्तां यदा,
मध्याङ्गं त्वथधातु चिन्तनमधोऽङ्गं चेज्जटा चिन्तनम् ॥१॥

जीवं जीवहिमांशुजौ रविकवी मूलं ब्रुवाते परे
धातुं प्रोचुरथौजराशिषु वदेद्धातुं जटां प्राणिनम्
भूयोऽपीति नवांशकः क्रमवशाज्ज्ञेयं समर्क्षेषु च
प्राक् जीवोऽथजटाथ धातुरिति हि ज्ञेयं नवांशक्रमात् ॥२॥

वीक्षेतात्मनवांशकं तनुगतं यद्वा त्रिकोणस्थितं
खेटः स्वीय नवांशगो यदि तदा चिन्तास्य धातोर्भवेत् ।
कुर्यादन्यनवांशगो यदि तदा जीवस्य चेतादृशं
पश्यदन्यनवांशमन्य नवभागस्थोऽस्यमूलस्य सः ।३॥

केन्द्रस्थौ बलिनौ दिवाकरकुजौ स्यातां यदा धातुगा
चिन्ताऽमुष्य तदाथ चन्द्रशशिजच्छायासुतास्तादृशाः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

संवित्प्रकाशकाव्यम्

चेन्मूलस्य तदाथ जीवभृगुजौ चेज्जावचिन्ता मता
यस्यांशे भवति क्षपापतिसुतः[1] सा योनिरत्रेष्यते ॥४॥

चिन्ताकस्य ममेति पृच्छति बलोपेतेष्विनाद्येषु वा
लग्नांशाधिपतौ तनौ सति वदेच्चिन्तासमस्याऽऽत्मनः।
दुश्चिक्ये सहजन्मनः सुखगृहे मातुर्भगिन्या अपि
स्यात्पुत्रस्य सुते रिपोररिगृहे भीरोः स्मरे खे गुरोः ॥५॥

धर्मे स्या त्सुकृतस्य चिन्तनमथो चिन्ताप्रवासाश्रिता
स्याल्लग्ने चरभे चरांशकगते भ्रष्टेंऽशकान्मध्यमात्।
तत्कालं मदनाद्ग्रहो यदिचलेत्तर्हि प्रतिष्ठास्यति
प्रायो गच्छति नैवगच्छति पुनश्चेद्वक्र्यसौखेचरः ॥६॥

कीदृग्गंगनया मयाद्यसमभूत्संगो यदीदंवदेत्
द्यूने भार्गवभौमभानुषु भवेद्भोगोऽन्यदीयस्त्रियाः।
जीवे स्वाङ्गनयः शशीन्दुसुतयोः स्याद्वेश्यया सूर्यजे
संगः शंकरजस्त्रियाऽऽकृतिवयोवर्णादि शीतांशुवत् ॥७॥

षड्गुः पापयुतः स्थितो नवमभे सौम्येरयुक्तेक्षितो
रोगार्तं परदेशगं गदति सच्छिद्रस्थितस्तन्मृतिम्।
अर्के सौम्यसमन्विते शुभखगैर्दृष्टेऽष्टमर्क्षस्थिते
तत्प्रष्टुः पितरं वदेज्जनपदादस्मात्प्रयातं परम् ॥८॥

कीदृक् चेतसि मेऽङ्गनेति विहिते प्रश्ने विलग्नं भजेत्
पश्येद् बालशशी बुधश्चकथयेद्बालां तदा चिन्तिताम्।
वृद्धामैनिरथो रविश्चधिषणप्राप्तः प्रसूतिं भृगुः
भौमश्चाप्यतिकर्कशामितिपरं ब्रूयान्नरे चिन्तिते ॥९॥

---

१ यस्यांशे संस्थितः सौम्यो योनिस्तस्य विनिर्दिशेदितिचण्डेश्वरः। विज्ञेयौ द्विपदौ शनीन्दुतनयावित्यादिना पूर्वोक्ता योनय इति। अत्र योनिशब्द उपलक्षणार्थस्तेन ग्राम्याग्राम्यौ जीवे, रसादिकं मूले ताम्रानिकं घातावपि ज्ञेयम्।

CC-0. Nepal Sanskrit Academy, Kathmandu

द्वितीयः सर्गः

चिन्तेयं यदि भोजने ममभवेत्कीदृक् तदेदंवदेत्
लाभांभस्तनुगाः शुभा यदि भुजिः स्यात्षड्रसा वाञ्छिता ।
लग्नस्थौ गुरूभार्गवौ यदि तदा भोज्यंवनेप्याप्यते
तुर्यस्थे हिमदीधितौ स[1]पटुता क्षारादिकं भोजम् ॥१०॥

मूर्तिस्थौ यदि सैंहिकेय रविजौ ध्वान्तारि दृष्टयान्वितौ
स्यातां तर्हि न भोजनं निजगृहे घातश्च शस्त्रोद्भवः ।
तुर्यस्थेऽवनिजे कटूष्णमशनं संतापवादान्वितं
कर्मस्थे त्विहमांसरक्तसहितं तुर्येरवौ नीरशम्[2] ॥११॥

वारिस्थे मधुरं गुरौ हिमकरे भोज्यंरसै रन्वितं
प्रालेयांशुसुते कषायमशनं सत्सत्कथा कौतुकम् ।
शुक्रे स्नेह समन्विताम्लमधुरं पंगौ तु भीशोकयुक्
तुङ्गस्थे तु रवौ नृपादि भवने[3]स्या दूष्णरक्ताशनम् ॥१२॥

नीचस्थे तरणौ तु नीचमशनं नींचालयस्थे कवौ
नीचस्थे विगतादरंकदशनं निस्नेहमन्यार्पितम् ।
क्रोडेकोद्रवकंगुरूक्षचणकं क्षिप्रादि तैलादिकम्
भोज्यं स्यादथवास्ति पुष्ट[4]इहयो भावस्ततः स्याद्भुजिः ॥१३॥

चरोदये भोजनमेकवारंस्थिरोदये द्विर्द्वितनूदयेत्रिः
भवेद्भुजिस्तुर्य गृहांकसंख्यां तथा चतुर्थ ग्रह संख्यया सा ॥१४॥
लग्नाधिपो भोजनदो जलेशो भोज्यंबुभुक्षा मदनाधिपः स्यात् ।
भोक्ता नभोधीश्वर इत्यमीषां यादृक्श्वभावो भुजिताद्दृशः सः ॥१५॥

---

१ स कटुतेति पा. । २ तिक्तकम् पा ।
३ राजारविः शशीराज्ञी मंगलो मण्डलेश्वरः । कुमारोज्ञा गुरुर्मंत्री सितोनेताऽनुगः शनिः ॥ लग्ने
सूर्यादयस्वोच्चे नृपादिगृहभोजनम् । इतिवामनः । ४ इह यो भावः
पुष्टःसबलः अस्ति, ततस्तस्माद्भृतिर्भाटकं भोजनं भवेदित्यर्थः । धनभावे धना-द्दत्तं बंधु
मेबन्धुनस्तथा । मित्रवेश्मनि तूर्ये स्यात् पुत्राद्भुक्तं तु पञ्चमे । शत्रुवेश्मनिशत्रौ स्याद्योषिद्वेश्मनिसप्त
मे ॥छिद्रे तु कपटाद्भुक्तं नवमे धर्म भोजनम् । दशमे राजलमार्गात्तु लाभे मित्रादनाहृत म् ॥त्र्ययेमु
लात्तथा भुक्तंभावादेव बलान्वितात् । लग्ने सर्वलोपेते स्वगृहे भोजनं भवेदिति वामनताजिकात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

गुरुकवी हिबुके बुधशीतगू यदि च लाभगतौभवतस्तदा ।
सदशनं वसनार्थसमन्वितं भवति शेषमिहात्ममतेर्वद ॥१६॥
काहकवीश्वरनन्दन गोविन्दकवीश्वरेण निर्णीते ।
संवित्प्रकाशकाव्ये करमितसर्गो विचिन्तनः प्रश्ने ॥

अथ तृतीयः सर्गः

कार्यसिद्धिधनराज्याप्तिचिन्ता

चिन्त्यं लग्नगृहं विलग्नपतिरप्येवं कुटुम्बादिको
भावः प्रष्टुरभीप्सितो य इह स ज्ञेयो हि कार्याभिधः ।
चिन्त्यः सोऽपि च तत्पतिश्च स शशी भावश्च भावाधिपः
चिन्त्याऽऽषामपि दृष्टिरेषु च सुहृच्छत्रुं च साम्यादिकम् ॥१॥

पश्येल्लग्नपतिर्विलग्नभवनं कार्यं तु कार्येश्वरो
लग्नं कार्यपतिश्च कार्यमुदयाधीशोऽपि लग्नेश्वरः।
कार्येशं तनुपं च कार्यप इहानुष्णांशुदृष्टौ फलं
पूर्णं पादफलं तु सद्ग्रहदृशि स्याल्लग्न ईशादृशि [1] ॥२॥

लग्ने स्वामिविलोकिते शुभखगादृष्टेफलार्द्धं भवेत्
पादोनं फलमीक्षिते तनुगृहे स्वेशेन सौम्येन च ।
मूर्तिर्नाथनिरीक्षिता शुभखगैर्द्वित्रैः समालोकिता
चेत्स्यात्तर्हि समामनन्ति सुधियः सम्पूर्णकल्पं फलम् ॥३॥

पापानीक्षितमीशदृष्टमुदयं पश्यन्ति चेच्छोभनाः
चत्वारः परिपूर्णमेवहि फलं चेच्छोभनैर्वीक्षितौ ।
लग्नेन्दू, फलमस्तिभव्यमथ तौ पापेक्षितौ नो फलं
मिश्रत्वे सति मिश्रनाथशुभदृस्येकस्य तुच्छं फलम् ॥४॥

---

१ लग्न पत्युर्दृशि इतिसाधुः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

तृतीयःसर्गः

ज्ञेयं यद्यदुदीरितं तनुगृहे जात्यायुराद्यं पुरा
तत्तन्नश्यति लग्नपे सति विनष्टे वैपरित्येऽन्यथा ।
यज्ज्ञेयं कथितं पुरा धनगृहादौ तद्विनश्येद्विन-
ष्टे तत्स्वामिनीचविनष्टइहतद्वृद्धिः परेष्वीदृशम् ॥५॥

यः क्रूरेण युतेक्षितश्च गतरश्मिः स्याद् विनष्टः स हि
क्रूराक्रान्त इतिष्यतेऽतिकुगतक्रूरेण यो जीयते ।
यः क्रूराश्रितमंशमाश्रयति स क्रूरान्वितः कथ्यते ।
यः क्रूरेण विलोक्यतेऽखिलदृशां क्रूरेक्षितोऽसौ मतः ॥६॥

यो भानोर्भवनं गतो जिगमिषुर्वासौविरश्मिर्मतो
ये योगाः किलकार्यसिद्धिकथकास्तेकार्य सिद्धिं तदा ।
तन्वन्तीन्दुरुपैति कार्यभवनं यस्मिन्ननेहस्यथो
बीजाभो भवतिक्षपेश उदयः स्यात्पुष्पवत्सर्वदा ॥७॥

कार्येशोदयपौ विलग्न सहितौ स्यातामथो कार्यगौ
यद्वा लग्नपतिर्विलग्नसहितः कार्येश्वरः कार्यगः ।
र्यद्वा लग्नपतिस्तनौ तनुपतिः कार्ये चतुर्द्व्याह्वयं
योगोऽमुत्र तयोर्मिथो दृशिदृशीन्दोश्चापि सम्यक् फलम् ॥८॥

अन्योऽन्यं तु तयोर्मिथोदृशिविना चन्द्रस्यदृष्टिं फलं
सार्द्धंव्यङ्घ्रि तदिन्दुदृश्यपि तयोरन्योऽन्यदृष्ट्यत्यये ।
पादः स्यात्फलमिन्दुदृश्यपि तयोरन्यस्य संदर्शने
किं चान्येप्यखिला विनाशशिदृशं योगाः फलाङ्घ्रिप्रदाः ॥९॥

षष्ठे मूर्तिपतौ निजस्य रिपुतां कुर्यात्स्वयं मृत्युगे
मृत्युःस्याद्व्ययगे व्ययो व्ययगतः पापो वदेत्सद्व्ययम् ।
पापः सद्व्ययमुष्णरश्मिरवनीपालाद्व्ययं नारितः
सोमस्तूत्सवभोगतो वसुमतीसूनुः परस्त्यादितः ॥१०॥

चान्द्रिस्तु क्रयविक्रयाच्छ्रुतमखाचार्यस्तु पुण्यात्कविः

CC-0. Nepal Sanskrit Academy, Kathmandu

संवित्प्रकाशकाव्यम्

कामिन्यारविजोऽशुभादथ वदेदन्यद्व्ययेशाश्रयात् ।
देहस्वामिनि वित्तरिष्फरिपुगे राज्येप्यभव्यंफलम्
विद्धेऽस्मिन्नशुभग्रहैर्नृपपदादिभ्यश्च्युतिर्दुःखिनः ॥११॥

मूर्तीशव्ययगौ व्यये यदि तदास्याद्बन्धनं चेत्सुखे
गुप्तं बन्धनमेव तन्नभसि तौ राज्येऽपि दुर्बन्धनम् ।
शीतांशुस्तनुवैरि मृत्युषु भवेच्चेत्स्यादसौ कष्टकृत्
स्थानेष्वेषु शशीस्थितो वितनुते मृत्युं विनष्टो यदि ॥१२॥

यो भावो निजनाथलग्नपशुभैर्युक्तेक्षितो वर्द्धते
ऽसावन्यो न तथाऽथपापयुतदृष्टो भावरातिक्षयम् ।
यद्यद्भावपतिस्तनौ स सभवेद्भावो निजाज्ञावशे
यद्यद्भावगतो भवेत्तनुपति स्तत्तद्वशेस्यात्स्वयम् ॥१३॥

मूर्तिश्छिद्रपतौ विलग्नसहितावेकत्रिभागस्थितौ
मूर्तिस्तर्हि निरामयाथ यदि तौ रन्ध्रस्थितावेककम् ।
द्रेष्काणं भजतो भवेन्मृतिरथो लग्नेशपुत्रेश्वरौ
पुत्रस्थानगतैककत्रिलवगौ चेत्तर्हिपुत्राप्तयः ॥१४॥

लग्नाधीशधनाधिपौधनगतावेकत्रिभागस्थितौ
स्यातांचेद्धनलब्धिरेवमपरेभावा विचिन्त्या स्तथा ।
भावो यस्तनुपाश्रितस्त्रिलवगात्मेशोदयेशान्वितः
स्यात्स्युस्तस्य समृद्धयो जनुरनेहः प्रश्नलग्नादिषु ॥१५॥

लग्नाधीशसमाश्रितांशकपतेर्लग्नांशकः स्वामिनः
स्याच्चेत्संयुतिदृष्टिसौहृदमिह स्याच्छर्मदेहाश्रितम् ।
नो चेत्संयुतिरैतयोर्नचभवेद्दृष्टिर्भवेच्छत्रुता
स्याच्चेदस्तमनंननीचगमनं स्यात्तर्हिदेहासुखम् ॥१६॥

मूर्तीशांशकनायकस्य च धनांशेशस्य युत्यादिकम् ।
विज्ञायाखिलमीरयेत्सदशुभं वा वित्तभाव फलम् ।
एवं मूर्त्यधिपांशनाथसहजाद्यं शेशयोर्वीक्ष्य तत्
संयुत्याद्यखिलं वदेत्सहजभावाद्याश्रयं यत्फलम् ॥१७॥

CC-0. Nepal Sanskrit Academy, Kathmandu

तृतीयः सर्गः

लग्नेशांशकतोऽग्रिमाग्रिमनवांशा ये समस्तो–ऽपि
स्युस्तेषामधिपैः सहोदयनवांशाधीश्वरस्यादिशेत् ।
योगावेक्षण सौहृदादि गदितं यत्प्राक् समस्तं हि तत्
दृष्ट्वा मासफलं शुभाशुभमयं मौहूर्तिकःकीर्तयेत् ॥१८॥

यद्वा मासफलं बुधः प्रणिगदेत्स्याद्येषु[1]धर्मद्यु ति-
र्नन्दांशेषु तदीयनायकसहस्रांशोर्मिथः संयुतिः ।
दृष्टिः सौहृदमस्ति चेच्छुभफलं चेत्छत्रुतानीक्षणा
योगा अस्तमयश्च नीचभगतिः स्यात्तर्हि दुष्टं फलम् ॥१९॥

छिद्रेशेऽस्तमिते कलेवरपतावभ्युद्गते नो मृतिः
लग्नेशास्तमये विनाशभवनाधीशोद्गमे स्यान्मृतिः ।
लग्नस्थे स्थिरभे भवेन्नगमनं जायेत नैवागमः
नश्येन्नो न च मृत्युमेति न गदातीतिर्नचातिव्ययः ॥२०॥

पूर्वोक्तं विपरीतमेव हि फलं ज्ञेयं चरर्क्षोदये
राशौ तु द्विशरीरगे तनुगते मिश्रं फलं कीर्तयेत् ।
राशिर्यो द्विकलेवरो निगदितस्तस्यादिमं यद्दलं
तज्ज्ञेयं स्थिरराशिवद्यदपरं तत्स्याच्चरक्षेत्रवत् ॥२१॥

वर्गश्चेदधिकः शुभस्य तनुभे स्यात्तर्हि भव्यं फलं
चेत्पापस्य तथातिनिन्दितफलं नात्रान्ययोगेक्षणम् ।
लग्नेऽर्कोदयके भवेद्यदिशुभः सौम्यस्य वर्गोऽथवा
ज्ञेया कार्य समृद्धिरत्र विपरीते वैपरीत्यं भवेत् ॥२२॥

होरा[2]राचेदूर्ध्ववक्रा भवति हि जनने प्रश्नकालेऽथ कार्य-
प्रारम्भे तर्हि लक्ष्मी बलपदविभुतां प्राप्तिरादेशनीया ।
यद्येषाधोमुखीस्याद्धनबलविभुता स्थानहानिर्विपच्च
स्याद्धोरातिर्यगास्याद्यदिकथय,तदा सर्वकार्यस्य सिद्धिम् ॥२३॥

---

[1] भावेषु नन्दांशकेषु धर्मद्युतिः स्यात्तस्माद्बुधो मासफलं प्रणिगदेदित्यन्वयः ।
[2] जेऽधस्तीर्यगास्य ऊर्ध्वतीर्यक् मुखेसमे

CC-0. Nepal Sanskrit Academy, Kathmandu

संवित्प्रकाशकाव्यम्

व्योमस्था घटसंहता[1]वुरितुलासौम्येक्षिता वोदयं
यानावीर्ययुताः शुभाय न दिता मेषु[2]रणस्थास्तु चेत् ।
पाथो[3]नाल्पजकर्कटाः शुभखगैरालोकिताः कुर्वते
नष्टार्थस्य झटीत्यवाप्तिमपि च प्रष्टुर्द्रुतं रोगिताम् ॥२४॥

मिथुनभीनतुरङ्गमृगायुताः शुभखगैरशुभैरनिरीक्षिताः ।
दशमभावगता वितरन्तिशं विदधते मुषितार्थ समागमम् ॥२५॥

मूर्तावुच्चगतं विलोकयति चेत्खेटो ग्रहस्तुंगगो
राज्यावाप्तिरिहाथकंटक गतैः स्याच्छोभनैः तत्फलम् ।
आरोग्यं प्रियसंगमश्च विजयो ऽभीष्टार्थलाभस्तथा
स्यादेतद्विपरीतमेव सकलं पापग्रहैः कैन्द्रगैः॥२६॥

शीर्षोदयलग्नगते ग्रहश्चे द्वर्तेत तर्ह्याशु लभेत सिद्धिम् ।
स्थानञ्चपूजाञ्चजयञ्चलाभं स्त्रियः श्रियञ्चापि सुखं त्रिवर्गम् ॥२७॥

तनुगतं निजमुच्चमवेक्षते यदि शुभः खचरो लभते तदा ।
विविधवाञ्छितमात्मसमीप्सितं पदमपि प्रभुतां वसुमानताम् ॥२८॥

केन्द्रे यदि स्यादशुभैर्वियुक्तो लग्नाधिपो मित्रममुष्य वा स्यात् ।
सिद्धि स्तदा केन्द्रमृतिव्ययस्थैः शुभैश्चलाभारि गतैश्च पापैः ॥२९॥

उदयस्थितं यदि हिमांशुसुतं परिपश्यतीन्दुरथपापखगः ।
लभते धनानि बहुलानि जयं नहि जायतेऽशुभममुष्य पुरः ॥३०॥

तनुगमतनुगतमशिशिरतरकरमहिमकिरणविहितजननइति ।
नयनजविदनुगतमतितनुत इह न वसुसमधिगतिरतिगदभयमपि ॥३१॥

चन्द्रं चान्द्रि वा लग्नस्थानस्थो दैत्याग्र्ये याचार्यः पश्येत्तर्ह्याप्नोति श्रे ष्ठीरांमां लक्ष्मीमृत्युर्विम
पापैर्युक्ते शुक्रे चन्द्रे वा स्यात्त्रिभिर्वैमत्यं यद्वा पातालस्थैः द्यूनस्थैर्वा तद्वाच्यम् ॥३२॥

---

१ वृष । २ दशमस्थानं ३। कन्या

CC-0. Nepal Sanskrit Academy, Kathmandu

तृतीयः सर्गः

लग्नेभौमं काव्यःपश्येन्नस्येत्स्नेहः सुन्दर्यांयदेवंस्याच्चेच्छायासूनुस्तर्हि स्याद्वै गभ्रंःशः ।
केन्द्रस्थं पश्यत्यर्को वार्किर्वाच्या चौरेभ्योभीर्जायते कष्टानि स्त्रीभिः सार्द्धं च स्नेहातिभीः ॥३॥

पश्यन्मित्रगृहं ग्रहोवितनुते लाभंजयं सौहृदं
नष्टावाप्तिमथोदये शुभरवगे सौम्यस्यवर्गेऽथवा ।
इष्टार्थं विषयान्तरं च लभतेऽथोवैरिवर्गे नृणां
अप्रीतिः पदच्युतीरिपुगणैर्नित्यं धनार्थक्षयः ॥ ३४॥

युग्मे काव्यगुरुर्वियत्यवनिजो लग्ने बुधश्चेच्छ्रियो-
ऽथोलग्ने गुरुरंवरेऽर्क इतिचेत्स्युः सत्यदाथेन्दिराः
जीवेमूर्तिगते र वौगगनगे चन्द्रे सुखे वा स्मरे
स्याद्वित्तं वहुशर्म चाथ तनुगेऽर्के भीतिरार्कौ रुजः ॥३५॥

भौमे शस्त्रभयं भवेतनुगते जीवेऽर्थवस्त्राङ्गनाः
स्युश्चान्द्रे विकलाङ्गना च मरणं शुक्रे तु पण्यस्त्रियः ।
अर्थावाप्तिरथाशुभे धनगते रोगस्तथा बन्धनं
वारिस्थेऽर्थहृतिर्विलग्नदशमस्थे मृत्युकल्पा विपत् ॥३६॥

तुङ्गादिस्थवियत्पतौ प्रमुदिते केन्द्रत्रिकोणस्थिते
राज्याद्यं पदमाप्यतेऽथ खचराः केन्द्रत्रिकोणोच्चगाः ।
चत्वारो यदिचोच्चगा वद तदा राज्यं कुलाद्याश्रयं
राज्यं तूच्चगलग्नपे सति परैर्मूलत्रिकोणस्थितैः ॥३७॥

वर्गोत्तमे शीर्षकृतोदयस्थे शुभान्विते क्रूरभवर्गयुक्ते ।
स्याद्राज्यलाभोऽथतथोदयेशकार्याधिपत्योर्मिथ ईक्षणे च ॥३८॥

छिद्रव्ययोदयगतो न शुभाय चन्द्रः पूर्णोऽपि यस्तु परिहीनतनुः सनिन्द्यः ।
चन्द्रोदये न शुभपापविलोकितः स्यान्नस्यात्तदर्थसमवाप्तिरिहास्त्यनर्थः ॥३९

पापानभःसहजगा स्तनुकामयाताः सौम्याः शुभायगदिता यदि वैपरित्यम् ।
आशैव केवलमथो नहि भव्यमस्ति पृष्ठोदयं तनुगते सुखधीशपापैः ॥४०॥

पापैर्युते शशिनि पापनिरीक्षिते च पापद्वयान्तरगते च धनाधिनाथे ।
पापे विलग्नपतिनांशमुपागते च नैवास्ति लाभ इह कोऽपि जयोऽपि नास्ति॥

CC-0. Nepal Sanskrit Academy, Kathmandu

लग्नेश्वरो वापि तदुच्चनाथ स्तन्मित्रखेटैरवलोकितश्चेत् ।
चलोपपन्ने सति लग्नराशौ सर्वार्थलाभं कुरुते नराणाम् ॥४२॥

सौम्यैर्दृष्टेलग्ने लग्नाधीशस्यार्थे षड्वर्गश्चेत् ।
तात्कालिक[1]यत्र ज्ञातव्या सिद्धिर्नत्वेवं चेन्नो सा ॥४३॥

लग्नेशलाभेशधनेश्वरा श्चेत्परस्परं संयुति दृष्टिभाजः ।
लग्नत्रिकोणद्रविर्णक्षयातास्तत्कालमेवोत्तमलाभदाःस्युः ॥४४॥

लाभे कुटुम्बे च निजेश्वरेण युक्तेक्षिते शोभनदृष्टियुक्ते ।
लाभो भवत्येव विपर्यये तु नैवार्थलाभो व्यसनं च हानिः ॥४५॥

लग्नपतौ रिष्फगते रिष्फपतौ लग्नगते ऽथ दृष्टे वा ।
सौम्यैः सद्व्यय उक्तो सद्व्यय उक्तोऽशुभे-मुस्मिन् ॥४६॥

अर्थाप्तिर्ज[2]नकप्र[3]सू हित[4]कर [प्र[5]त्यर्थि [6]वन्ध्व[7]ङ्गना ।
[8]भृत्यभ्यो भवति क्रमेण दशमस्थैर्लग्नतो वेन्दुतः ।
भान्द्यार्कैर्बलिभिर्बलान्विततनुः शीतांशुघर्मद्युति
स्थानाधीश्वर सेवितांशकपतिः प्रोक्तार्थलाभाधना ॥४७॥

संप्रेर्यमाणस्तु पतेत नित्यं बलीयसा प्राक्तनकर्मणैव ।
पृच्छेद्यतो दैव विदं ततः स्यात्प्रश्ने जनुश्चापि फलेन तुल्यम् ॥४८॥



---

१ अत्रार्थशब्दः प्रयोजनवाची तेन प्रश्नोपयोगिनीभावे इत्यर्थः । २ सूर्यः
३ चन्द्रमा ४ मङ्गलः, ५ बुधः, ६ बृहस्पतिः, ७ शुक्रः ८ शनिः,

CC-0. Nepal Sanskrit Academy, Kathmandu

चतुर्थः सर्गः

पृच्छाऽनेहसि मङ्गलावह जयार्थाकर्णनग्वेक्षणं
मूर्द्धांशस्तनदंतहस्तवदनश्रोत्राणि गण्डस्थलीम् ।

नासांघक्त्रकटीं च पादतलगुह्यादिं स्पृशेत्पृच्छको
ब्रूयादत्र शुभं नचेदिह वदेत्सर्वेप्सितार्थक्षयम् ॥४६॥

काहकघीश्वरनन्दन गोविन्दकवीश्वरेण निर्णीते ।
संघित्प्रकाककाव्ये गुणमितसर्गो गतः पूर्तिम् ॥३१॥

अथ चतुर्थः सर्गः

विवाहस्त्रीपुंसो विचारः

शशीलाभस्त्रीधीसहजरिपुनिष्ठः शशिसुता-
ऽहिमां[1]शुभ्यामिज्येन च समवलोक्यो यदि भवेत् ।
तदा सावुद्वाहं प्रतिगदति वा सौम्यखचरा-
स्त्रिकोणे केन्द्रे वा विहितनिजवासा अपि तथा ॥१॥

रिःफैशे तनुगे व्ययेतनुपतावुद्वाह इष्टो न चेत्
कन्यांशस्थितकामिनीनरखगौ केन्द्रस्थितौ पश्यतः ।
कन्यांशं तमुगं तदा परिणयः प्रश्नस्य काले तु चेत्
वीणावेणुमृदङ्गशंखनिनदगितादितत्रोद्वहः ॥२॥

लग्नस्थो मदनाधिपो भवति चेत्कन्याप्तिरिन्द्विन्दुजौ
पश्येच्चेदुदयस्थितो भृगुसुतो जायाप्तिरासिस्त्रियः ।
शुक्रेन्दू द्विपदांगनांशकगतौ वीर्यान्वितौ लग्नभ
पश्यन्तौ जितु[2]मस्थितौ यदि तदाथार्के समे स्त्रीभवेत् ॥३॥

---

१ उष्णांशुः । २ मिथुनः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

भामिनीभवनगा यदिखेटा लग्नवर्तिललनानवभागम् ॥
प्रापयन्ति नयनातिथिभावं भावयेदिहवधूसमवाप्तिम् । ४॥

द्यूने कर्कटचन्द्रमस्यशुभखेटायुक्तकेन्द्रेष्वथ
सौम्यैर्व्योमनि लाभगे दिनकरे चन्द्रे स्वतुङ्गस्थिते ।
स्त्रीलाभोभृषजूककर्क वृषभेष्विन्दुःशनौवीक्षिते–
श्वेतेष्वप्यबलाप्यतेऽथ तनुपेन्दू सप्तमे स्त्रीप्रदौ ॥५॥

जामित्रं शुभमन्दिरं यदि शुभाः केन्द्रत्रिकोणस्थिताः
पश्यंत्यत्र शुभाङ्गना च यदि तत्पापर्क्षमत्राशुभाः ।
स्त्रीराशिस्थखचारिलग्नसहितं योषिद्गृहांशं यदा
पश्यन्त्यत्र सुकन्यकाप्तिरथवा पङ्क्तौ समर्क्षे स्थिते ॥६॥

लग्ने योषित्प्रभागो यदि भवति वधूनन्दभागः सितेन
ग्लावावावीक्षितस्तर्ह्यतिगुणवरवर्णिन्यवाप्तिं करोति ।
यद्वा जामित्रमत्रोपचयगशशभृज्जीवदृष्टः प्रदत्ते
जायां यद्येषपापैर्युत उत परिदृष्टस्तदा स्त्री निहन्ता ॥७॥

जायाद्यूनपतिः पतिस्तनुपतिस्तौ चेत्स्मरे वा तनौ
प्रेम स्यादुभयोः परस्परमिमौ चेन्मित्रभे तर्हि सत् ।
अन्योऽन्यं सुहृदौ च तौ यदि तथाऽपि प्रेम तौ चेन्मिथः
शत्रुःशत्रुगृहेच नीचभवने तर्ह्येतयोर्वैरिता ॥८॥

कामेशे तनुगे प्रियस्यसुतनुर्वंस्योदयेशेस्मरे
प्रेयस्या वशगः प्रियोऽथतनुपास्ते सौमिथः पश्यतः ।
तर्हि प्रीतिपरायणासहचरी सध्रीचि सध्र्यङ्पुनः
प्रेयस्यामथ मित्रता यदि तयोः प्रेमातिरेकोऽनयोः ॥९॥

CC-0. Nepal Sanskrit Academy, Kathmandu

चतुर्थः सर्गः

तुर्ये सौम्यनिरीक्षिते वसु दिशेदन्याङ्गनायै पतिः
सौम्यैर्व्योमनि चेक्षिते तु दयिता जाराय दत्ते धनम् ।
लग्ने सौम्यनिरीक्षिते धवधनं भुङ्क्ते सदा भामिनी
छिद्रे सौम्ययुतेक्षिते तु रमणो रायं रमण्या हरेत् ॥१०॥

लग्ने चित्रशिखण्डिजो यदि कविः कामे तदा कामिनी
कान्ते नो रमते रमेत च परैः पुंभिः परं पुंश्चली ।
लग्नस्थे शशिजेऽङ्गनाऽनृजुमतिर्भौमेऽभिमानान्विता
जीवे श्रीसहिता, भृगावतिधना, क्रोडेऽधना दुर्भगा ॥११॥

पुष्टः सौम्यतया युतश्च स भवेद्यः सौम्यदृष्ट्यान्वितः
पापैर्योऽन्वित ईक्षितश्च स मतोऽपुष्टस्तथा क्रूरितः ।
पुष्टेऽस्ते सुविवाहिता सहचरी तुर्ये तु पुष्टे धृता,
पुष्टे मन्मथचा[1]रिणि यदि तदा द्वे स्तो धृतोद्वाहिते ॥१२॥

तुर्ये क्रूरित इष्यते सुपरिणीता क्रूरितेऽस्ते धृता
ऽथो नोढा नधृतांगना स्मरसुखे चेत्क्रूरिते द्वे अपि ।
सौम्यत्वं समुपागते हिबुकभे क्रूरत्वमाप्ते स्मरे
जीवेन्नैव विवाहिताऽस्य वनिता जीवे[2]तु या स्याद्धृता ॥१३॥

क्रूरेसप्तमशर्मवर्तिनि भवेच्चेन्निर्बलो भार्गवः
तर्हि प्राणिति नांगना थ तमसि द्यूने पुरंध्रीमृतिः
पुष्टे पुण्यगृहे प्रियस्य पतिपुण्यैर्जीवति प्रेयसी
प्रेयान् प्राणिति सुन्दरीसुचरितैः पुष्टेऽङ्गनापुण्यभे ॥१४॥

यावत्पुण्यखगैः सुहृद्रिपुसमैर्युक्तः कलत्राधिपो
राशिर्वात्र वदे त्स्त्रिया उपपति स्तत्तत्समास्तावतः ।
प्रश्ने जन्मनि वा विलग्नगरिपुक्षेत्रेस्थितौ शोभनौ
स्यातां पाप समन्वितौ यदि तदा स्यात्कालकूटाङ्गना ॥१५॥

---

१ सप्तमस्थाने ।२ जीवित इत्यर्थः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

भद्रा नाम तिथिः कुजार्कितनयाधारा यदा कृत्तिका-
श्लेषाधारूणपित्र्यभानि विषकन्या जायतेऽत्र ध्रुवम् ।
क्रूरर्क्षोदयगाऽशुभग्रहनवांशाश्चेत्तदा दुर्भगा
ऽथोरण्डा भवति क्षमात्मजरविक्रोडान्विते लग्नभे ॥१६॥

मदनगशुभवर्गो भार्गवग्लौसमेतौ यदि भृगुसुतदृष्टौ बहवः इष्टाः पुरन्ध्र्यः
भृगुसुतशशिनौ चेत्कामगौ तर्हि तद्वद् द्यूनगतभृगुवर्गेप्यङ्गनाढ्य उक्ताः
॥१७॥

सा सघर्णा भवेज्जीवशुक्रांशेः मदनाधिपे ।
भौमार्काकेन्दुभागस्थे किञ्चिन्न्यूनकुलोद्भवा ॥१८॥

द्यूननाथे धनांशस्थे[1] जायास्याद्व्यभिचारिणी ।
तदांगना पुनर्भूः स्याद्यदि शुक्रशनी स्मरे ॥१९॥

स्त्री वियोगोऽस्तगे भौमे शनि दृष्टे तु तन्मृतिः ।
धीधर्मस्मरगौ सूर्यशुक्रौ विकलदारदौ ॥२०॥

सप्तमस्थं यदा राहुं पश्यतः पापखेचरौ ।
तदा न प्राप्यते भार्या प्राप्तापि म्रियतेऽचिरात् ॥२१॥

कन्यालग्नगते भानौ शनौ मीने मृतिस्त्रियाः ।
जायेश रविभौमांशगते स्यादेककांगना ॥२२॥

षष्ठस्थानगते भौमे विनाशभवने शनौ ।
सप्तमे सैंहिकेयश्चेत्तस्य योषिन्निजिघति ॥२३॥

शुक्राच्चतुर्थाष्टमगैरसौम्यैः पापद्वयाभ्यन्तरगेऽथ शुक्रे ।
शुभैरदृष्टे रहितेऽथवापि योषिद्विनाशोऽग्निनिपातपाशैः ॥२४॥

कान्हकवीश्वरनन्दन गोविन्दकवीश्वरेण नीर्णीते ।
संवित्प्रकाशकाव्ये चतुर्थसर्गोऽङ्गना प्रश्ने ॥

---

१ धनभावस्थयोंऽशस्तस्मिन्नेवांशे ।

CC-0. Nepal Sanskrit Academy, Kathmandu

पञ्चमः सर्गः

गर्भविचारः

तनुपे शुभवीक्षिते तनौ हिमगौ चार्भक सम्भवो भवेत्
मतिगा अथवाऽष्ट गा यदा शशिशुक्रोदयपास्तथा भवेत् ॥१॥

सुतपतौ[1] तनुभावमधिष्ठितेतनुपतौतनयं गतषत्यपि ।
दृढ शुभग्रहदृष्टिसमागमे भवति गर्भवति नियतं वधूः ॥२॥

भृगुजावनिजत्रिनेत्रजा निजभागस्थितिशालिनोयदा ।
गुरूरस्ति विलग्नगोऽथवा नवमे पत्यसमृद्धयस्तदा ॥३॥

जीवे पुण्यविलग्नपञ्चमगते गर्भस्य सम्भावना,
भामिन्यर्भवती भवेत्सुततपोनिष्ठैः शुभै पञ्चमम् ।
चेत्सौम्यानवलोकितं बलयुतैः पापग्रहैः संयुतम्
दृष्टं पापग्रहैश्च तर्हि निगदेत्सत्संततेरत्ययम् ॥४॥

कन्यावृश्चिककर्सिहगोषु सुतभस्थे सद्बलेऽपत्यदा[2]
पुत्रे पुत्रपतीन्दुवासवपुरोधोदैत्यवन्द्येन्दुजैः ।
धीर्याढ्यैःसुयुतेक्षिते सति सुताः सन्त्येव दीर्घायुष-
स्तर्मिस्तैरयुतेक्षिते तु भवति प्रायः स्वपत्यात्ययः॥५॥

मतिस्थितौ वाऽऽयगतौ यदा मिथः प्रपश्यतश्चन्द्रभृगूतदार्भसूः ।
सुसंप्रसूता भवति यदा तदा नभोगता भार्गवजीवचन्द्रजा ।[2] ६॥

पापोपेतसुतास्पदे स्वपतिना नालोकितेऽर्भच्युतिः
पुत्रर्क्षे शशिशुक्रदृष्टिरहिते नो संततेः सम्भवः ।
यावत्संख्ययथाविधाशुभखगैर्गर्भोऽथ गर्भेश्वरो
दृष्टस्तद्विधमेति संक्षयमपत्यं तस्य तत्संख्यकम् ॥७॥
यत्संख्येखचरैर्विलोकितमपत्यर्क्षं तया संख्यया

---

१ स्वल्पसन्तानता इति पा ।
२ सुसंप्रसूता भवतीति जानते यदाऽम्बरस्थाः कविजीवचन्द्रजा इति साधुः पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

संवित्प्रकाशकाव्यम्

संख्येयोऽर्भक संभवो नर[1]धू संख्यात्र पुंस्त्रीखगैः ।
संख्या पत्यगताथवा तनयराश्यंशस्य संख्या समा
नीचोच्चस्य शुभाशुभग्रहसमा संख्या तु जीवन्मृते ॥८॥

उशनोवनीजेक्षितान्वितो मृगलक्ष्मा शुभ संयुतेक्षितः ।
सुतपस्तनुपस्तुलग्नगो नरराशौ न चिरात्मजप्रदः ॥९॥

लग्ने यदा पुरुषखेटविलोकिते स्याद्युक्तो बलेन नृभवर्ग इहोपदेश्यः ।
गर्भे पुमानथ विलग्नगतेऽङ्गनर्क्षे वर्गेऽङ्गनाखदृशा सहितेऽङ्गनागस्यात् ॥१०॥

त्यक्त्वा लग्नभमर्कजे विषमगे पुत्रोऽथजीवोष्णगू
ओजर्क्षे यदिपुंप्रसूतिरथचेच्छुक्रेन्दुभौमाः समे ।
तर्हि स्त्रीजननं यदा तनु तनुस्वा[2]म्यंशुमान्नोऽङ्गना-
राशौ सन्ति नराङ्गना जनुरमी चेत्पुङ्गृहे पुंजनि ॥११॥

ओजर्क्षे विषमांश[3]गास्तनुरचीन्द्वीज्या नृजन्मप्रदाः
ते चेत्स्युः समभे समांशकगतास्तर्ह्यङ्गनाजन्मदाः ।
पुत्रेशोदयपौ यदा नरगृहे पुत्रोऽस्ति गर्भेतदा
स्त्रीराशौयदि तौ तदा तु कथयेद् गर्भस्थितां कन्यकाम् ॥१२॥

कन्या जन्म यदा तदा समगृहे छायासुत स्यादथो
स्वीयांशं समवाप्नुयात्सुतगृहेशो यावताऽनेहसा ।
कालोसौ कथितः तुरातनबुधैः सीमन्तिनीनां शुभा-
पत्योदुभूतिनिदानकारणतयाख्याति परामागतः ॥१३॥

नरराशिगतो वपुः पतिर्न[4]भगं पश्यति पञ्चमाधिपम् ।
सुतजन्मपतौ तु लग्नगे द्वीशरीरे सशुभे[5]बुधेक्षिते ॥१४॥

---

१ सुतसुता इति युक्तः पाठः । २ सूर्यः । ३ विषमांशके इत्यपि पाठः । ४ नरगमित्यपि । ५ सुतभे पा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

पञ्चमः सर्गः

चेच्चत्वारि भवन्ति खेटयुगलान्यत्राप्यपत्यद्वयं
द्वयङ्गस्थैर्बहुभिर्बलेन सहितैश्चान्द्रीक्षीतैर्वा तथा।
लग्नाद्यावतिभे भवेद् भृगुसुतो मासान् वदेत्तावतो
लग्नांशैर्गतभाविभिर्गतभविष्यद् गर्भमासानपि ॥१५॥

तनयभमविनष्टो वीक्षते यत्र धीशो
भवति जनिरिहाथो द्वादशांशे हि यत्र।
विधुरमृतकरां तत्संख्यया तुल्यराशि
गतवति तुहिनांशौ स्याज्जनिः प्रश्नकाले ॥१६॥

तिष्ठेच्चेद्दिवसग्रहो दिवसराशिस्थे विलग्ने तदा
वाच्यं जन्मदिवाथ नैवमिति चेद्रात्रौ च संध्यासु तत्।
नाड्यर्कस्य तदा सुतोऽथ शशिनः कन्याथ षण्ढोर्द्वयोः
निर्गच्छत्यनिलेन जीवतिविशद्वायौ तु जीवेच्छिशुः ॥१७॥

अशुभमध्यगतौ भवतो यदा तनुतुषारकरावनिरीक्षितौ।
शुभरवगैरिह गर्भयुताङ्गना पृथगथो युगपन्मृतिमाप्नुयात् ॥१८॥

यदि भूमिजभानुजेक्षितं सुतभं शोभनदृक्समुज्झितम्।
इह जारजगर्भमादिशेदशुभैर्वा चरराशिगैरपि ॥१९॥

यदा सपापोऽर्कं युतोऽथवा शशी यद्वा नपश्येच्छशिनं तनुं वा।
जीवोऽथ सेन्दु स्तपनं नपश्ये ज्जीव स्तदा जारज गर्भ माहुः ॥२०॥

सुतो भवेदौरस इज्यवर्गे सुतस्थिते सौम्य गृहे च धीस्थे।
सुताधिपे शुक्र नवांशसंस्थे शुक्रेक्षिते संततिवृद्धिरिष्टा ॥२१॥

जातं जातं पुत्रं हन्ति क्षोणीसूनुः पुत्रर्क्षस्थः।
दैत्याचार्ये पुत्रं प्राप्ते जायन्ते षट्कन्यास्तस्य ॥२२॥

शुक्रेन्दुवर्गेऽथ समर्क्षवर्गे जामित्रसंस्थे बहुकन्यकाः स्युः।
दाक्षायणीशोशनसावुभौ चेत्संपश्यतस्तं यदि चैककोऽपि ॥२३॥

१। चिन्त्य एष श्लोकार्धः।

CC-0. Nepal Sanskrit Academy, Kathmandu

संवित्प्रकाशकाव्यम

वंशोच्छित्तिर्विज्ञातव्या जामित्राऽऽकाशाम्भोनिष्टैः ।
अस्वप्नामित्राभ्यर्च्यांघ्रिर्द्वानुष्णज्योतिः पापैः ॥२४॥

कलेवरं प्राप्तवतीनपुत्रे भसन्धिसंस्थोशनसि द्युनस्थे ।
सुतास्पदे शोभनदृष्टिशून्ये भवन्तिवन्ध्यापतयो मनुष्याः ॥२५॥

पश्यंत्यात्मजमीदृशं सुकृतिनो दिग्वस्त्रमस्तत्रपं
धूलीधूसरविग्रहं च जटिलं भक्तप्रियं शङ्करम् ।
आर्योढाश्रितभूतिमुत्तमवृषासक्तं कुमारान्वितं
स्वात्मारामसुपेतसाम्यधिषणं भक्ता यथा धुर्जटिम् ॥२६॥

यज्जायेत सुखं पितुस्तवसुतो जातो भवान् वर्द्धते
दिष्ट्येत्याप्तवचःश्रवात्तदुपमा नैवेति शर्मान्तरम् ।
एष्टव्या बहवःसुता यदि यजेताप्यश्वमेधेन वा
नीलंवा वृषमुत्सृजेदथ गयां गच्छेदितिस्मर्यते ॥२७॥

किंभूयो गदितेन येन विधिना सत्पुत्रसंभूतयो
लभ्यन्ते यजनार्चनस्तुतिजपध्यानोपवासादिना ।
पूर्वाचीर्णविकर्म निष्क्रियविधानेवाथ सर्वात्मना
संख्यावान्प्रयतेत सद्गुणसुतप्राप्त्यर्थमत्यादृतः ॥२८॥

धनधान्यगुणाद्यं हि पुत्रीणामेव सार्थकम् ।
मूर्तिर्मूर्तिमतां मूर्ता भूतिर्जो मूर्तिजो यतः ॥२९॥

काहकवीश्वरनन्दन गोविन्दकवीश्वरेण निर्णीते ।
संवित्प्रकाशकाव्ये पञ्चमः सर्गः सुतप्रश्ने ॥ ५ ॥

---

१ अस्वप्नाःदेवा तेषाममित्राणि दैत्या स्तै रभ्यर्चितमंघ्रि द्वन्द्वं यस्ये त्यनेन शुक्र ईति ।
२ वृषे धर्मे बलीवर्दे संख्या पुंराशि भेदयो रिति। ३ धराद्यमिति प

CC-0. Nepal Sanskrit Academy, Kathmandu

षष्ठः सर्गः

अथ गमागमपृच्छा

क्रूरे नभोहिबुकयोर्गमनं, शुभे तु नस्यादथाम्बरगते तनुपेऽथ चेन्दौ ।
यात्रा भवेदथ चतुर्थगृहे तु पापखेटान्विते विपरिवृत्तिरशर्म मार्गे ॥१॥

तनुगृहादथवा हिमरश्मिभाद् यदि कुटुम्बगता व्यगा यदि ।
बुधबृहस्पति दैत्यपुरोहिता न भवतो गमनाऽऽगमने तदा ॥२॥

बुधशुक्रार्कसौरिणामेकोऽपि चरलग्नगः ।
तदाऽऽशु गमनं वाच्यं प्रष्टुर्वक्रगते स्तुन ॥३॥

स्थिरलग्ने शनिज्याभ्यां दृष्टे नैव गमागमौ ।
चरखेचरदृष्टे तु चरलग्ने गमागमौ ॥४॥

जीवो वा शशधरनंदनोऽपि वाऽर्कः शुक्रो वा यदि चरलग्नमाश्रितः स्यात् ।
निर्देश्यं गमनमिहाथ[1] मार्गतः स्याद्व्यावृत्तिः स्थिरतनुगा भवंत्यमी चेत् ॥५॥

यदि द्वितीयं च भवेत्तृतीयं गृहं तिरश्चांशुभखेटयुक्तम् ।
वदेद्बुधः प्रष्टुमुपागतस्य ध्रुवं तिरश्चां गमनं तदानीम् ॥६॥

स्थिरोदयं पश्यति पञ्चमस्थः शनिर्नुरुर्वा यदि न प्रयाणम् ।
स्थिरे गृहे चन्द्रतनू तदा नो गमश्चरे ते यदि न स्थितिः स्यात् ॥७॥

दुरुधरा यदि तर्हि गमागमौ न भवतो यदि पापकृता तु सा
विपरिवृत्तिरशोभनरोधनं यदि तु सा शुभजा शुभरोधनम्

प्रत्यूहः पथि मन्मथं गतवति क्रूरेऽम्बरस्थेपुनः
स्याद्विघ्नोऽवनिपालवर्गजनितःपूज्यैर्नरैर्वाकृतः ।
पुण्याधीश्वरपीडिते तनुपतौ विघ्नोऽध्वनिर्जायते[2] ।
द्यूनेशो व्ययपान्वितो वियति चेच्चौरादिविघ्नुद्भवम् ॥८॥

---

१ मिहार्द्ध इत्यपिपाठः । २ स्याच्छनि इत्यपिपाठ ।

CC-0. Nepal Sanskrit Academy, Kathmandu

स्यात्प्रत्यर्थिपतौ तु पाप सहिते ऽनर्थोऽथ लग्ने शुभे
सौख्यं तुर्यगते हितं परकृतं द्यूनेऽन्यभूमेः सुखम् ।
आकाशेऽर्थसमृद्धयोऽथतनुपं चन्द्रं च यः पीडयेत्
पापोऽसौ यदि पुंग्रहोऽस्ति पुरुषाद्भीतिर्जलर्क्षे जलात् ॥१०॥

तिर्यक्भेऽत्र भयं तिरश्च उदितं पृथ्वीगृहे च क्षितेः
सिंहे हिंस्रमृगादितो भयमिति मीने जलौकोद्भ[1]वम् ।
वित्तेशस्तु पराक्रमोदयवियल्लाभस्थितश्चेत्तदा
स्यादस्यात्र विलम्ब एष तु पुनर्गच्छेत्प्रदेशान्तरम् ॥११॥

तुर्ये पाप निपीडिते सति विपद्व्यावर्तनं चाप्यथो
सौम्याद्दृष्टयुते कुजेक्षणयुते चन्द्रे विघातोऽम्बनि ।
लग्नेशाहिमदिधिती यदि रिपौ कामेऽथवा नीचभे
स्यातां छिद्रपसंयुतौ वद तदा रिष्टं प्रवासाश्रितम् ॥१२॥

यत्संख्या अशुभा भवन्ति निधने स्तत्संख्यकास्तस्करा
दृश्यन्ते पथि चेद्धनोदय कवीन्द्राभ्यर्चिता निर्बलाः ।
भौमार्कौ निधने यदा पथि तदा चौरादितो भीर्नभी
चौरादेऽस्तु पराक्रमार्थतवघश्चेत्सौम्ययुक्ते क्षिताः ॥१३॥

लग्नेशादथवा विलग्नभवनाद्यत्संख्यकाः शोभना
मार्गस्थानगता भवन्ति नियतास्तत्संख्यया संमितान् ।
पांथस्याभ्युदयानुसंति हि मुहुर्मार्गे थ चेदीदृशाः
पापाः स्युः पथिकस्य वर्त्मनि तदा तत्संख्यकोपद्रवान् ॥१४॥

भृगुसुते मृगलक्ष्मणिवांगनागृहमुषेयुषि योषिदवापितान् ।
विविधभोगभरान् पथिकः पथि स्वबलतोऽथ भुनक्त्यविशंकितः ॥१५॥

---

१ जलौकाद्वयमित्यपि पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

षष्ठः सर्गः

चरोदये विभ्रमणं नवाच्यं स्थिरोदये तद्द्वयमिष्टमेव ।
द्विदेहभे लग्नगते त्रिवारं विश्राम इष्ट शुभखेट युक्ते[1] ॥१६॥

स्थिरे विलग्ने गमनागमौस्तश्चरे मतौ तौ न विमिश्रता तु ।
भवेद्द्विदेहेऽत्र विचार्यवाच्यं तत्तद्ग्रहावेक्षणसंगमादि ॥१७॥

क्रूरः कामधनान्त्यगोऽथ हिमगुर्लग्नारि मृत्युस्थितो
यद्वाक्रूर समीपगो विधुरथो लग्नेऽर्क इन्दुस्मरे ।
चत्वारोगदिता इमे मुनिवरैर्योगा अमीषु ध्रुवम्
स्वस्थानामपि सम्भवंति विपदः स्याद्रोगिणां पञ्चता ॥१८॥

जिगमिषु श्च जिगीषु रिलापतिः समभिपृच्छति तत्र धनेकुले ।
ज्वलन युद्धविषादभयान्यथो भवति चौरभयं धनगेऽर्कजे ॥१९॥

भवति भूपतिचेतसिसंततं विविधचिन्नक[2]ल्पनमाधयः।
उदयतुर्य गृहान्तरगा शुभे न शुभमस्ति नृपस्य चमूखे ॥२०

हिबुकमन्मथमध्यगतो ऽशुभो लघुनिवर्तनमस्ति तथा विपत् ।
स्मरखमध्यगतोऽशुभखेचरो नरपतेर्विपदः पदवीजुषः ॥२१॥

गगनलग्नभमध्यगतोऽशुभो यदि, तदा विपदो विनिवर्तनम् ।
भवति शंतिवह योग चतुष्टये तनुप चन्द्रमसोः शुभद्रक् यदि ॥२२॥

आयस्था यदि चन्द्रभौमरविजा लग्ने भृगुर्धिद्रबी
दुश्रिक्यांबुगतौ सुते सुरगुरुः सर्वान्विजित्य द्विषः ।
सिद्धार्थः समुपैतिधाम यदि वा वाचस्पतौ लग्नगे
चन्द्रे कर्मगते रिपौदिनकरे सिद्धिर्भवेदुत्तमा ॥२३॥

स्यात्सिद्धिस्तनुगे गुरौ. रिपुगते शुक्रेऽष्टमे भास्करे
ऽथो भौमार्कजयोर्वियत्युदयगे जीवे ह्यमात्यात्तयः ।
लग्नस्थे चरभे शुभेन सहिते स्युः शोभनानि ध्रुवं
पापैः स्यात्सहिते न शोभनमथो लग्ने स्थिरे स्याच्छुभम् ॥२४॥

---

१ दृष्टे पा । २ चिन्त्यमिदम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

भंगो भौमशनीन्दुसूदयतपोबुद्धिस्मरेषु स्मृतो
मृत्युःस्यादुदयस्थयोः शनिसितांशोर्भौम संदृष्टयोः ।
मृत्युर्मृत्युगयो शनिक्षितिजगो भानौ विलग्नस्थिते
स्याद्दुश्चिक्य विनाश लाभ गतयो श्चन्द्रार्कयोः पञ्चता ॥२५॥

प्रष्टुःस्यान्नसनं बुधेन्दु वसुधा पुत्रैः स्मरस्थे रथ
क्षुन्मारिरिपुगृद्धयश्च तनुगौ चेद्वार्गवोर्वी सुतौ ।
लग्नस्थौ यदि शीतदीधिति धरासूनु सपत्न स्थितौ
शुक्रेन्दू निधनस्थितौ दिनकरः स्यात्तर्ह्यमात्यात्ययः ॥२६॥

वक्रव्यो शुभ खवरैः सुतर्क्षसंस्थैःपृच्छायां तनयवधो हि पृच्छकस्य ।
भङ्गस्यादवनिसुते सशीतरश्मौ लग्नस्थे दिनकरनन्दनेन दृष्टे ॥२७॥

दशमोदयकामधीधनोपगताः सौम्यखगाः पदार्थदा ।
अशुभानशुभा व्ययायगा उदयेग्लौ न हितो हितोऽवरे ॥२८॥

यदि वाक्पतिरीक्षते विधुं स्मरवित्तोपचये गतं तदा ।
भवति प्रमदा निमित्तकं विविधं तद्दर्शीप्सितं फलम् ॥२९॥

मार्गे मार्गपतिर्भवेद्शुभयोर्मध्यस्थितश्चेत्तदा
रौद्रो वर्त्मनि कथ्यते ह्यथचरे लग्ने चरांशेऽपिवा
रात्रीशः परदेशतो लघुसमा यात्यध्वगोऽथ ग्रहो
नार्या यत्र पराक्रम सममुपैत्यस्यां समेत्यध्वगः ॥३०॥

केन्द्राद्याति यदा ग्रहः पणफरं पान्थागमः स्यात्तदा
मार्गेश स्तु यदा श्रयोत्तरदले स्यादध्वगोऽत्राध्वनि ।
तद्वत्काम गते शशिन्यथ चरंलग्नं चरांशस्थित-
श्चन्द्रस्याद्विवुके यदा वद तदा पांथं स्वगेहान्वितम् ॥३१॥

CC-0. Nepal Sanskrit Academy, Kathmandu

षष्ठः सर्गः

पूर्णेन दुर्निधनस्थितो यदि शुभैर्युक्तोऽथवा वीक्षितः
स्यात्पान्थागमनंसुखेनसधनं स्याद्वैपरित्येऽन्यथा।
दुश्चिक्यार्थसुखेशु शोभनखगाः पान्थागमं कीर्तयं–
स्तीन्द्रार्चासुरपूजितौ तु सुतरां जीवस्तु केन्द्रस्थितः ॥३२॥

पापः पाप विलोकिता सुततपा जामित्रशत्रुस्थिता
हन्युः पान्थ मथोगुरौ गगनगो तुङ्गे नृपाल्लब्धयः ।
षष्ठे पुष्ट गुरौ रुजोऽथ रविजे राहौ च मृत्युस्थिते
स्याद्भीति स्तनुगौ तु काव्यधिषणौ चेच्चौरतो न व्ययः ॥३३॥

भानौ सिंहगतेऽष्टमे निजसुतोपेतेक्षिते मङ्गले
सेन्दौ शस्त्रभवोऽभियात उदितः पान्थस्य मार्गश्रितः ।
पाताले ग्रहसंयुते निजगृहायातं वदेदध्वगं
जामित्राम्बुगृहांतरालगखगे पान्थः पथि प्रस्थितः ॥३४॥

पृष्ठोदयेष्वशुभदृष्टि समन्वितेषु वर्त्मन्युपद्रव इति प्रवदेद्गतस्य ।
धर्मेशनावशुभयोगिनिवान्यदेशे रोगो भवेत् मृतिगृहे त्विहमृत्युरेव ॥३५॥

धनतनयपराक्रमेषु खेटैः पथिकसमागम एषु शोभनैस्तु ।
अपगतपुरुषादि लब्धिरेवं विधुगुरुभार्गवयोः समेति शीघ्रम् ॥३६॥

यदिमदनगतोऽथ वैरी गो वा ग्रह इह केन्द्र समन्वितः सुरेज्यः ।
परजनपदतः समेति पान्थो मतिनवमस्थित इन्दुजेसिते वा ॥३७॥

अमृतकिरणमष्टमंनिरीक्षा शुभखचरोज्झित कण्टकञ्चवाच्यम् ।
निजगृह मुपयास्यति प्रवासी शुभ युतकण्टक एति लाभयुक्तः ॥३८॥

शुभदृशमनवाप्य पापदृष्टाः सहजगता अशुभा वदंति नष्टम् ।
पथिकमरिगता अवाप्तमृत्युं हृतवसुमेनममी च कण्टकस्थाः ॥३९

---

१ चिन्यमिदं ।

CC-0. Nepal Sanskrit Academy, Kathmandu

यतम ग्रहगतः खगोविलग्नात्ततम गुणा हत राशि चक्र संख्या ।
परविषयगता गमाह संख्या भवति निवर्तनमस्य चक्र काले ॥४०॥

सर्वाधिकबलः खेटोलग्नाद्यत्र गृहे भवेत् ।
तत्तुल्यमास संख्यैः स्यात्प्रयातु विनिवर्तनम् ॥४१॥

चरराशि नवांशस्थे तस्मिन्मानमिदं मतम् ।
द्विगुणं स्थिरभांशस्थे त्रिगुण द्व्यात्मकांशके ॥४२॥
पृच्छायां सप्तमाधीशो यदा चक्र गतिर्भवेत् ।
समयः स प्रतिष्ठा सोः प्रधासाद्विनिवर्तते । ४३ ।

नायातो निजमन्दिरं किमुहतो बद्धोऽथवासाविति ।
प्रश्ने मूर्तिगताऽशुभेन हि हतं नाप्यादिशेत्संयतम् ।
पापैर्वूनविनाशगै रथ तनुस्त्रीसंस्थितै र्वीदयं
छिद्रस्थैः किल संयतश्च नियतो मुच्येत चातः परम् ॥४४॥

लग्ने भास्करसूनुसंश्रित दृकाणे वा हि संवेष्टिते
प्रष्टुर्बन्धनमिन्दु सौरसहिते लग्नेऽपि तद्बन्धनम् ।
पापक्षेत्रमधिष्ठिते मदन धीरंध्रांबु पुण्यस्थिते
दृष्टे पाप खगै र्विकर्तनसुते स्याद्बन्धनं पृच्छतः ॥४५॥

लग्नस्थे चरभे भवेदचिरतो मोक्षः स्थिरेऽसौ चिरात्
द्व्यङ्गे मध्यमकालतोऽथ हिमगावप्येवमेवा दिशेत् ।
तावच्चौर बलं बली भृगुसुतो यावद्विलग्नस्थितो
निर्वीर्येतु भृगौ कलेबर गते बद्धस्य मोक्षो मतः ॥४६॥

प्रस्नोदयःसंग्रह लग्ननाथमूर्तीशमित्रैः यदि संयुतः स्यात् ।
त्रिकोण केन्द्रेषु शुभाश्रितेषु बद्धो विमुच्येत तदा निबन्धात् ॥४७॥

केन्द्राधिपे केन्द्रमधिष्ठितेतु संवत्सरै तत्र भवेन्न मोक्षः ।
मोक्षो भवेन्मृत्युकरैर्हियोगैर्मुक्तिः शुभाढ्योचरभे विलग्ने ॥४८॥

काहकवीश्वरनन्दगोविन्द कवीश्वरेण निर्णीते ।
संवित्प्रकाशकाव्ये षष्ठः सर्गो गमागमप्रश्ने ॥६॥

CC-0. Nepal Sanskrit Academy, Kathmandu

सप्तमः सर्गः

अथ वृष्टपृच्छा

हिमांशूष्णांशुभ्या मदनगृहयातौ सितशनी
विलग्नाद्यद्यातौ हिबुक निधनस्थानसहितौ ॥
तनुस्थानाद्वा तौ धनभवन दुश्चिक्यभगतौ
तदा वर्षाकाले सलिलमभिवर्षंति जलदाः ॥१॥

सिते पक्षे सौम्या यदि सलिलराशौ सहजभे
धने वा केन्द्रे वा विदधति जलौघं जलमुचः ।
तथा लग्नं याते शशिनि सलिलाढ्याऽऽलयगते
तथेन्द्राशाभागे रटति करटे वाऽति विधुरम् ॥२॥

धने दुश्चिक्ये चेद्भवति जलराशिर्जलखगो
ऽथवा तत्रस्थश्चेद् भवति सलिलं निश्चितमिह ।
चरेराशिर्वित्ते सहजभवने वा शुभयुतो
यदा सप्ताविंशे[1] पतति दिवसोऽम्भो बहुतदा ॥३॥

तुलागोकर्कालिमकरघटमीना जलयुता
मता अन्ये ये राशय इह मता वारिरहिताः ।
शशी वर्षाकाले स्मरनवम बुद्धिरिधनसुतात्
शुभैर्दृष्टो यद्वा भृगुतनयतोऽस्ते सलिलदः ॥४॥

बलक्षेप[2] क्षेप्रा (प्ता) वृषि सजलराशौ शशिसितौ
शुभैर्दृष्टौ केन्द्रे दिशत उदकं भूरि यदि तौ ।
ग्रहैः पापैर्दृष्टा नवबहुजलं[3] प्रश्नसमये
जलासंनिष्ठा वेक्षण पदजलादेष्वपि जलम् ॥५॥

जलोपेतं गेहं ससलिलखगाढ्यं सलिलदं
मतं, साम्भः खेटा सलिलभगता, वांशसहिताः ।
यदा तर्ह्यप्यम्भो भवति, सलिलं भूरि बहुलं
बुधेन्द्विन्द्राचार्य्यासुरगुरुषु पाताल गतिषु ॥६॥

---

१ 'सप्तविंशे" इति साधु । २ चिन्त्यमिदनम् ।
३ बहुलमथतत्प्रश्नसमये पा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

संवित्प्रकाशकाव्यम्

यदा शुक्ले पक्षेशुभसहितदृष्टः शशधरो
भवेन्नीचे केन्द्रेष्वपि च सलिलं भूरि दिशति।
शुभोपेतैः केन्द्रै[1]र्भवति सजलैः पाद सलिलं
समस्तैतैः पापद्युचरसहितैर्नास्ति हि जलम् ॥७॥

यदा केन्द्रेषु स्युः सजलखचरा निर्जलखगा-
स्तदा वृष्ट्यर्द्धं स्याद्यदि तु हिबुके सूर्यतनयः।
तदा दुर्भिक्ष्यं स्यात्कलिरपि मिथोऽथावनिसुत
स्तनौ गुर्वीवृष्टिर्भवति चपला गर्जितयुता ॥८॥

तनौ शुक्रश्चन्द्रोऽवनिजरविजौ चापिमिलितौ
यदि स्युः स्याद्वृष्टिः सकलजनतानंदशुभगाः।
यदा वृष्टेर्यागे सति भवमि लग्ने चरगृहं
तदा षड्भिर्यामैः पतति सलिलं हि द्विगुणितैः ॥९॥

सलिलमधस्ताज्जलवत्यजलेन युते विनिर्देश्यम्।
उपरिजलं विपरिते जलवद् द्वय संगमे भूर्यम्भः ॥०॥

तिसृषु[2]ककुप्सु कुलायं वृष्ट्यै काकस्य निर्दिष्टम्।
तद्दुर्भिक्षं मरकं कुरुते याम्येषु कोणेषु ॥११॥

काककुलायजाते मूर्द्धनि वृक्षस्य वर्षति प्रचुरम्।
मध्येमध्यं वर्षति स्कन्धे जाते नजातु वृष्टिः ॥१२॥

भूमौ भग्नानोकहे कोटरे च वल्मीके च श्वभ्रदेशे तटेषु।
काकोलस्या[3]४लोक्यं नोडंनिगाद्यं धीरै र्निवृन्नाशमायास्यतीति ॥१३॥

आषाढाऽसित हेरंबे यद्यजैकांघ्रिभं भवेत्।
मेघावृतं वियद्वृष्टिः प्रावृट् शस्तान्यथा तु न ॥१४॥

---

१ केन्द्रगैरित्यर्थः। २ याम्यध्यतिरिक्तेषु। ३ देशनाश

CC-0. Nepal Sanskrit Academy, Kathmandu

सप्तमः सर्गः

वैशाखे त्रितिथि शुक्लाऽमावास्यां न सरोहिणी ।
तदा निरुदका मेघा दुर्भिक्षं करकादिकम् ॥१५॥
आषाढ शुक्लसप्तम्यां द्युरात्रिके मलिने हिमैः ।
चन्द्रार्कौ वृष्टिदौ स्यातां तद्वन्मार्गोदितत्रये ॥१६॥
पुनर्वसोर्भवेद्वृक्तिर्यावत्याषाढ शुक्लगे ।
प्रतिपद्दिवसे तावद्वृक्तं प्रावृषि वर्षणम् ॥१७॥

चित्रास्वातिविशाखासु यस्मिन्मासे न वर्षति ।
तस्मिन्मास्युज्वला मेघा इति गर्गो मुनिर्जगौ ॥१८॥

रोहिण्यार्द्रामघास्वातिज्येष्ठासु च्युत्तरासु च ।
संचरन् भूसुतो हंति मेघान् संवर्तकानपि ॥१९॥

शाके त्रिगुणिते द्वाभ्यां युक्ते वारिधिभाजिते ।
शेषे समे भवेद्वृष्टिः प्रचुरा विषमेऽल्पिका ॥२०॥

वर्षेऽत्र कस्यां दिशि सस्य संपत्स्वास्थ्यादि कस्यां ककुभीतिभीतिः ।
दौर्भिक्षदौस्थ्यादि च संभविष्यत्येवं कृते प्रश्न इतीरणीयम् ॥२१॥

लग्नं पूर्वं ककुभ्मताथ गगनं दिग्दक्षिणोदिरिता
जामित्रं वरुणस्यदिङ् निगदिता पातालमुक्तोत्तराः ।
सौम्याधिष्ठितदिक्षु सस्यमधिकं स्वास्थ्यं मतं सर्वतः
पापोपेत ककुभ्सु दौस्थ्य मभितो दुर्भिक्षमीत्यादि च ॥२२॥

याऽऽशास्याद्बहुवर्षमिलान्वित शुभैर्दृष्टात्रसस्यं सुखं
या दृष्टाखिलपापिभिर्बलयुतैः सोक्तेति दुर्भिक्षभूः ।
चेत्केंद्रेष्वखिलेषु शोभनखगा देशेषु सर्वेष्वपि
स्यात्स्वास्थ्यं स सुभिक्षतैवमशुभाश्चेद्वैपरित्यं तदा ॥२३॥

---

१ आषाढकृष्णस्य गणेशतिथ्यामजैकपादर्क्षे युतेऽम्बुपातः ।
यदा तदा प्रावृषि पूर्णतोयं नोचेन्नचेतिप्रवदन्ति संत इति ॥
अर्कोदकास्तौ घन सन्निगूढौ स्यातान्नभः शुक्लग शैल तिथ्याम् । यदा
भविष्यत्यमितै तदब्दे हैमन्त मन्नं किल शारदान्नमिति ज्योतिः संग्रहे-
बूर्णान्त मानादुक्तम् । २ सप्तम्यामष्टम्यां नवम्या मित्यर्थः । ३ मार्गे पौषे
माघे शुक्ल पक्षे ।

CC-0. Nepal Sanskrit Academy, Kathmandu

संवित्प्रकाशकाव्यम्

कान्हकवीश्वरनन्दन गोविन्दकवीश्वरेण निर्णीते ।
संवित्प्रकाशकाव्ये सप्तमसर्गो जलादिकप्रश्ने ॥७॥

अष्टमः सर्ग

अथ निधिप्रश्नः

तुर्यं पश्यति तुर्यपोऽस्ति विभवो लभ्येतवाऽसौ यदि,
क्रूरस्तर्हि निधिर्भवेत्पुनरसौ नाप्येत चेत्तुर्यभम् ।
स्वेशाद्दृश्ययुतं शशीक्षितमिह स्यात्स्वायतेयं पुन-
र्वर्षे तत्र च लभ्येतेऽथ भृगुजे लोकान्नृपात्स्याद्धनम् ॥१॥

तुर्यचन्द्रकवीज्य योगिनी भवेद्युम्नं[1] हि रश्म्यादिकं
रत्नाद्यानि बहुन्यथोऽस्ति धिषणः शुक्रोऽथ यत्रस्थितः ।
स्थाने तत्र वसूदितं हिबुकपश्चेत्केन्द्रनिष्ठ स्तदा
गेहान्तर्गृहगोनिधि र्हिबुकपे बाह्यस्थिते स्वंबहिः ॥२॥

चन्द्रे शर्म्मगते पितुर्द्रविणमस्त्याप्येत सम्वत्सरे
तस्मिन् शस्त्रहतस्य तु स्वमवनी सूनौ स्मरच्छिद्रगे
छाया सूनुविधुंतुदौ निधनगौ चेत्स्वर्गतानां भवेत् ३
तुर्यं चेत्स्वपतीक्षितं ग्रह युतं स्यात्पूर्वजस्वं तदा ॥३॥

केन्द्रे शेन्दु गुरुः प्रयच्छति निधिं यच्छन्ति यत्नं विना
पातालार्थगताः शुभा अपि निधिं शुक्रस्तु लाभस्थितः ।
स्वस्य स्वीयजनस्य बालपकमनल्पं वा प्रयच्छे न्निधिं
सौम्यास्तु स्थिरभे स्थिता धनगता दद्युर्निधिं पूजनात् ॥४॥

दक्षिण पक्षो लग्नात्षड्भं वामोऽन्य षड्भमुदिदष्टम् ।
हिबुकेशो यत्र भवेत्तत्र निधिः केन्द्र पणफरगः ॥५॥

---

१ द्युम्नंवित्तेबलेऽपिच । २ चतुर्थस्थानम्

CC-0. Nepal Sanskrit Academy, Kathmandu

नवमः सर्गः

केन्द्राध्य१स्त शुभग्रहे गृहगते वाच्यं निधानं बुधैः
पक्षे यत्र गृहस्य शोभनखगा स्तत्रैववाच्यो निधिः ।
लाभे शीतमयूखसंगम समा लोकोज्झिते शोभनै :
संयुक्ते च निरीक्षिते च सनिधिं प्राप्तिं समुत्कीर्तयेत् ॥६॥

प्रा२प्तिर्नास्ति त्वयोगे चेच्चन्द्रः क्षीणोऽथनीचगः ।
विनष्टो वा तदा ज्ञेयं निधिरस्ति न चाप्यते ॥७॥

नैवाप्यते निधिरशीतकरैविनाशस्थानस्थिते तनुगते सति सैंहिकेये ।
दुश्चिक्यपुण्यहिबुकोदयधीविपत्स्थाः सौम्यग्रहा यदि तदा द्रविणप्रणाशः ॥८॥

धिष्ण्ये सर्वास्युदिते लग्ने वा निर्गते चन्द्रात्
यतमानोऽपि निखातद्रव्यं नैवाप्नुयाज्जातु

तुर्ये तमोऽथ रविजो यदि शल्यमस्ति पातेसुखेऽवनिसुते दशमे च शल्यम् ।
युक्तौ विधुन्तुदशनी वदतोहिशल्यं शल्यं तु पाप सहिते भवनस्थ भागे ॥१०॥

काहकवीश्वरनन्दन गोविन्दकवीश्वरेण निर्णीते ।
संवित्प्रकाशकाव्ये वसुमित सर्गो निधिप्रश्ने ॥८॥

अथ रिपुबलागमप्रश्नः

लग्नस्थे चरभे स्थिरे शशधरे स्याद्वैरिचक्रागमोः
Sथोचेल्लग्नगतं भवेच्चरगृहं चन्द्रोद्विदेहस्थितः ।
तर्ह्यायाति रिपुर्विधाय पृतनां द्वेधा निजां चेदिह
स्यात्पापग्रहदृग्भवंति तु तदा तस्मात्पराभूतयः ॥१॥

---

१ केन्द्राद्यस्य इति पाठ । २ निधिर्नास्ति पा ३ व्ययस्था पा।

CC-0. Nepal Sanskrit Academy, Kathmandu

संवित्प्रकाशकाव्यम्

आयाति द्विजरा[1]जमित्रमुदय स्तौचेच्चरर्क्षे यदा
शुक्रेज्येन्दुसुतेषु शर्मभवनस्थेष्वेति सेना रिपोः।
पापेषु व्ययवित्तलग्नरिपुधीत्रिस्थेषु सेनैत्यरे-
र्वित्ते वा सहजे कविर्गुरुरेः सेनाध्वगाप्येति च ॥२॥

कवीज्यज्ञा यदा तुर्ये तदैति रिपुवाहिनी।
शीघ्रं चरोदये तु स्याज्जीवोऽर्को वा तदैत्यरिः ॥३॥

पश्यत श्चेन्मिथो लग्नं पुण्येशौ तर्ह्यु पैत्यरिः।
सबले लग्नगे पापे शत्रोर्दैवान्मृतिः पथिः ॥४॥

मार्गान्निवर्तेत सपत्न इन्दुकलेवरौ चेद्द्विकलेवरस्थौ।
लग्ने स्थिरे वा द्वितनौ विधौतु द्वयङ्गे निवर्तेत रिपुः समीपात् ॥५॥

द्विकलेवरमस्ति लग्नगं हिमरश्मिश्चररराशिगो यदि।
समुपेत्य तदार्द्धमध्वनों विनिवर्तेत सपत्न उत्सुकः ॥६॥

मूर्तिगं स्थिरगृहं यदा निशानायको द्वितनुराशिसंस्थ :।
स्यात्तदा विपरिवृत्तिमेत्यरिर्द्रागतीत्य बहुमार्गमंतिकात् ॥७॥

मार्गादेव निवर्तते S रिररिधीनिष्ठेषु पापेष्वरिः
प्राप्तोप्याशु नितर्तते हतबलो भग्नो शुभैरन्वगैः।
शत्रोरस्ति पराजयो हिबुकगे कर्केऽर्कपेऽलौघटे
प्रत्यर्थी तु पलायते यदि चतुष्पाद्राशय तुर्यगाः ॥८॥

स्थिरेऽविलग्ने चरमेशशाङ्के चक्रं परेषां समुपैति नैव।
तदापि नायाति बलंपरेषां यदोदयेन्दू स्थरराशिनिष्ठौ ॥९॥

नायाति[2] चक्रं द्विषतां तदानीं पातालगाःस्यु र्यदि पापखेटाः।
जीवःशनिर्वा स्थिरलग्नगश्चेत्तदारिपुः स्थानमधिष्ठितोऽस्ति ॥१०॥

---

१ द्विरमित्रचक्रम् पा

CC-0. Nepal Sanskrit Academy, Kathmandu

नवम :सर्ग:

तुर्यस्थितौ यदि शशाङ्करवी तदारिर्नायात्यसौ यदि धनुर्वृषसिंहमेषाः।
लग्नेथ, वारिणिखगै रहिता युता वा शीघ्रं तदा रिपुरुपैतिनिवृत्तिमेव ॥११॥

यावद्भिर्दिवसैर्लग्नाच्चन्द्रस्य भवनं भवेत्।
रिपुस्तावद्भिर्नैरैति मध्येचेन्न ग्रहोऽनयोः ॥१२॥

प्रथमं विहितः समुद्यमो गमने येन स यायिशब्दभाक्
तनुते तदनूद्यमं तु यःसभजेत्स्थायिपुरेशपौरताम् ॥१३॥

तृतीयाद्ये दले पौरा नवमाद्येषु यायिनः।
शुभखेटयुते भागे जयोऽन्यत्र पराजयः ॥१४॥

लग्ननाथो मतो स्थायीतुन यति मदयाधिपः
लग्नेशे कामगे यायी वश्योऽन्यस्तु विपर्ययः ॥१५॥

तनुमन्मथकर्मवर्तिनः शुभखेटा जयदा पुरेशितुः।
नवमे बुधजीवभार्गवा जयदा भौमशनी तु भंगदौ ॥१६॥

बुधजीवसिता धर्मस्थिताः पौरजयावहाः।
नगराधिपभंङ्गाय भाग्यगौ भौम भानुजौ ॥१७॥

क्रूरा यायिजयंकुर्य्युर्लग्नबुद्धित्रिवैरिगाः।
मेषूरणोदयाऽऽयान्त्य स्थिताः स्थायिजयप्रदाः ॥१८॥

मूर्तिमन्मथगाः सौम्यग्रहाः स्थातुर्जयावहाः।
लग्नगे लग्नपे प्रष्टुर्जयोऽन्यस्याऽस्तगेऽस्तपे ॥१९॥

बुधस्तुर्येभृगुः कामे चन्द्रच्छिद्रं तदा जयः।
तद्वद्रंध्रारिलग्नस्थैः सूर्यवाक्पतिभार्गवैः ॥२०॥

१। यायि पा.

CC-0. Nepal Sanskrit Academy, Kathmandu

संवित्प्रकाशकाव्यम्

पापा लाभ सपत्नरिष्फसहिता यातुः शुभं तन्वते
स्थातृणामशुभाऽन्यथो तनुगते क्रूरे तृतीये बुधे।
तिग्मांशौ हिबुकोपगे सति भवेद्युद्धं महिनाथयो–
र्यस्तत्रास्त पुराधिपः स हि विनाशयति याताऽल्पशः ॥२१॥

कर्मायव्ययलग्न राशिषु शुभे यायी नहन्यात्पुरं
याता तन्नगरं निहन्ति कथितस्थानेषु पापा यदा।
हन्याद्वैरिपुरं जिगीषुरशुभे लग्नाम्बुकर्मस्थिते
लाभस्था गुरुशुक्रसूर्यशशिजाः पौरस्य कुर्युर्जयम् ॥२२॥

पुंलग्नतो दशभगेष्वशुभेषुयायी गृन्हाति पत्तनमरेरथपापवर्गे।
लग्नस्थिते सतिखगैरशुभैर्युते च दृष्टेऽपि युद्धमतुलं जयदं नृपाणाम् ॥२३॥

पापाः [1]प्रत्यर्थिबुद्धिस्थाः पराक्रमगता अपि।
वैरिहस्तगतं कुर्युर्नगरेश्वर पत्तनम् ॥२४॥

सौम्याः कामपमित्राणि यदि सौम्ययुतेक्षिताः।
लग्नारिकामनाथानां वैरं चेत्स्यान्मिथः कलिः ॥२५॥

लग्नसप्तमपौ क्रूरौ [2]क्रूरांशस्थौ रणप्रदौ।
व्रूतो लग्नाऽस्तपौ केन्द्रे सक्रूरौ वक्रितौ रणम् ॥२६॥

क्रूरवर्ग स्थितः क्रूरयुक्तो दृष्ट स्तनुस्थितः।
क्षीणेन्दुर्युद्धदस्तद्वत्क्रूरोप्यन्योऽन्यवर्गगः ॥२७॥

दुर्गे किं भवितेति पृच्छति जने ज्ञातव्यमेवं विदा,
क्रूरे रंध्र विलग्नगे न हि भवेद्दुर्गस्य भंगोऽथचेत्।
क्रूराःकाम विलग्नयो स्तनुपती रिष्फे कुटुम्बेऽष्टमे
[3]कामे वैरिणिवा भवेद्यदि तदा दुर्गस्य भंगोनहि ॥२८॥

---

१ षष्ठस्थानम्। २ द्वितीयस्थानम्। ३ तृतीयस्थानम् इति प्राचीनपुस्तकेषु संकेतः।

CC-0. Nepal Sanskrit Academy, Kathmandu

नवमः सर्गः

लग्नेशो व्ययगः कुटुम्बभवने पापस्तदा वेष्टितं
दुर्गं नैव तु गृह्णतेऽथ धनरिष्फस्थः शुभश्चेत्तदा ।
दुर्गाद्यस्ति हि वेष्टितं नतु ग्रहितुं शक्यते तत्परै-
र्दुर्गं वेष्टितमस्तिभीतिरपिचेत्पापा धनायस्थिताः ॥२९॥

राहौ सप्तमगे भवेदचिरतो दुर्गस्य भङ्गो भवे
लग्नस्थौ हरिवृश्चिकौ शुभदृशा युक्ता वथो केन्द्रगौ ।
दुर्गस्था सुख मासतेऽथ धिषणे धीलाभकर्मस्थिते
जायेतारिबलं पराङ्मुखमिह स्यादुर्गनिष्ठः सुखी ॥३०॥

एकेनापि बलेनवासरमणे निर्गत्य लब्धोदये
लग्नं तीक्ष्णदृशा[1] विलोकयति चेत्सौम्यग्रहोऽत्रा दिशेत् ।
दुर्गस्था बहिरेत्य दुर्गवरणादायो धनायोद्यता
हन्युर्वैरिवरूथिनी शुभतनू नाथेऽपि केन्द्रस्थिते ॥३१॥

चतुरस्रोथवा त्र्यस्रो वृत्तो वा दुर्ग ईदृशे ।
प्रश्ने स्यादेद्बलोपेतलग्नदृग्ग्रहभावतः ॥३२॥

लग्ने सौम्येक्षिते दूर्गे वह्नी भूर्व्यत्ययेऽन्यथा ।
यत्र कोणे शुभाः खेटा विपण्यादि भवेदिह ॥३३॥

क्रूरा नभो हिबुकगा यदि तर्हि दुर्गे स्यात्पंचता बहुजनस्य तथा महीजे ।
छिद्रेश योगिनि यदा तु चतुष्टयस्थः षड्गुस्तदा भवति दुर्गजनस्य बन्धः
॥३४॥

वादे वैरिवधे चौर्ये धातुवादे रणादिषु ।
लग्ने क्रूरग्रहः श्रेष्ठः क्रूरद्रङ्नात्र शस्यते ॥३५॥

पापै स्तुर्यधनायगै र्भवति[2] तत्स्थानं परै वेष्टितम्
क्रूरै स्तुर्यनभोगतैः स्वत इह स्तो वेष्टनोद्वेष्टने ।
लग्नेशेऽभ्युदिते गते समगतिं दुर्गस्थितो वीतभीः
योद्धुं वाञ्छति तत्र वक्रिणि भवेद्दुर्गस्थितो विह्वलः ॥३६॥

---

१ स्निग्धदृशा पा । २ शुभोपेत पा । ३ चेदित्यपि पाठः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

मूर्तीशेऽस्तमिते विभेति रणतो दुर्गस्थितश्चेच्छुभौ
पातालोदयगौ तदास्ति सुखितोऽथो तुर्यनाथोदयौ ।
पश्येल्लग्नपतिस्तदापि[1] सुखितोऽसौपापयुक्कण्टके
दुर्गस्थो म्रियते धने बहुखगा श्चेद्दुर्गगोऽल्पो जनः ॥३७॥

नरराशि[2] गता यदा शुभा उदयायव्ययकर्म संस्थिताः ।
भवितोभयसंधिराद्यगैश्शुभैर्व्ययगैर्विरोधिता ॥३८॥

लग्नेश्वरस्य सुहृदौ यदि केन्द्रनिष्ठाः सौम्याश्च तर्हि भवितोभयसन्धिरेव ।
संधिः शुभेक्षित शुभे तनुगेऽथ सन्धिः सौम्ये तपः सहजलाभ सपत्नभस्थे
॥३९॥

दुश्चिक्यारिनवान्त्यगे शुभरवगे लग्नस्थिते वावपतौ
सौम्यालोकितसंयुतेऽस्ति नियतं सन्धिर्नृपाणां मिथः ।
लग्ने पापयुतेक्षिते विघटते संधिर्यदा केन्द्रगः
पापो लग्नपशत्रुरस्तपसुहृद्यद्भप्रदो भूपयोः ॥४०॥

नरराशिगताः शुभग्रहाः शुभदृष्टाश्रितकण्टका मिथः ।
जनयन्ति रतिं तथाविधामशुभाः पापविलोकिताः कलिम् ॥४१॥

सुतभाग्यभकेन्द्रगैः शुभैरशुभैः कण्टकमृत्यु वर्जितैः ।
सकलार्थसमाप्तिमादिशेद्विपरीतैः रक्चरै विपर्ययम् ॥४२॥

मृदनायपराक्रमात्मजेष्वशुभैर्हीयत एषु शोभनैः ।
बहुलब्धिरथोदयस्थिते नरराशौ सशुभेऽर्थसंपदः ॥४३॥

उदयव्ययभत्रिकोणगाः शुभखेटाः शुभदास्तथाशुभाः ।
कथिता लयगा वितन्वते भयमिष्टार्थविनाशनं रुजम् ॥४४॥

लग्ने बलाधिके सन्धौ लग्नपोऽर्पयते करम् ।
द्यूने बलोज्झिते सन्धौ दण्डंधत्ते स्मराधिपः ॥४५॥

---

१ तदारि पा ।

२ युग्मकन्यातुलाकुम्भा नराः प्राक्तौक्षिकस्य चेति बुद्धिः विलासिन्याम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

दशमः सर्गः

संधौ लग्नबले दण्डमादत्ते मदनाधिपः ।
बलसाम्ये द्वयोर्दण्डं नादत्ते नददाति च ॥४६॥

बली चेल्लग्नपो हन्ति सबलं मदनेश्वरम् ।
आये बलाधिके सन्धिर्निर्बलेऽत्र मिथः कलिः ॥४७॥

मेषूरणस्थितैः सौम्यैर्यायी दत्वा धनं व्रजेत् ।
पापे लग्नगते पापैर्दृष्टे युद्धे भयावहम् ॥४८॥

काहूकवीश्वरनन्दन गोविन्दकवीश्वरेण निर्णीते ।
संवित्प्रकाशकाव्ये नवमोऽखिलादिगमादिकः सर्गः ॥९॥

अथ रोगप्रश्नः

जायालग्नविनाशपञ्चमगतैः सौम्यैः शुभालोकितै-
श्चन्द्रे चोपचयस्थिते सति रुजांनाशोऽथ पापग्रहे ।
रिष्फः प्राप्तिविनाशगे सति गदोद्रेकातिपीडा भवे-
च्चन्द्रश्चन्द्रसुतोऽथवा तनु गत पापेक्षितो रोगदः ॥१॥

भौमो लग्नगतात्मराशिसहितः कुर्याद्रुजं मन्मथ-
श्छिद्रस्थस्तु मृतिं कलिश्च तनुगो रिष्फस्थितस्तु व्ययम् ।
लग्ने पृष्ठकृतोदये सति यदा पापा विलग्नस्थिता
यद्वाकेन्द्रगताः शशी मृतिगतः स्यान्मृत्यवे रोगिणाम् ॥२॥

---

१ आयस्थानम् ।, २ शीर्षोदयायुग्मसिंहाल्यश्विनौलिघटस्त्रिय
इति बुद्धिविलासिन्याम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

संवित्प्रकाशकाव्यम्

क्रूरत्वं समुपागते शशधरे छिद्रस्थिते [1]कष्टता
भोगीन्द्रैर्यदि गृध्रकोलवदना राशित्रिभागा स्तदा ।
मृत्युः स्याद्गदिनामथोपचयधीधर्मोदयद्यूनगाः
सौम्या रोगविनाशनाय गदिनां स्युः पञ्चतायै परे ॥३॥

पंगुश्चारवशेन हन्ति [2] विचरन् सौम्यग्रहानीक्षितो
यद्यद्राशिमशोभनैश्चसहितः स्यात्तस्यतस्य ध्रुवम् ।
प्राणानामपहारको गदवतश्चेद्यस्य चाथोदया-
नुष्णांशू शुभवर्गगौ शुभयुतौ स्यातांरुजां नाशनौ ॥४॥

तनुमन्मथधीविनाशगाः शुभखेटाः शुभवीक्षिता यदि ।
गदिनांगदशान्तिशर्मणः कथयेच्चोपचयस्थिते विधौ॥५॥

लग्नान्मृत्युगतोऽशुभो यदि जनुर्नक्षत्रमीक्षेतचे-
द्रोगी याति यमालयं यदि भवेत्पापोऽष्टमःकेन्द्रगः ।
क्षीणेन्दुव्ययगश्च कोऽपि गदिनां मृत्युस्तदाऽथाऽशुभा
रन्ध्रास्तोदयगाः शुभास्तु विबालश्चेत्पञ्चतातर्ह्यपि ॥६॥

लग्ने चेच्छनिभागगो हिमकरः कामेऽर्कजो वा कुजो
मृत्युस्थास्त्वशुभाः शुभागतबला श्चेद्रोगिणः स्यान्मृतिः ।
मेषे लग्नगते यदाऽवनिसुतः स्याद्वृश्चिकांशस्थितः
प्रालेयांशुसमन्वितोऽवनितनूजोमृत्यवे कीर्तितः ॥७॥

स्मरधनव्ययगेष्वशुभेशु चेत्तनुसपत्न विनाशगतो विधुः ।
भवति तर्हि मृति र्गदितां द्रुतं शशिनि पाप समीप गतेऽपी च ॥८॥

दिनकरे तनुगे शशिनि स्मरे गदि मृमिर्निरुजां तु महापदः ।
रिपुगतेशशिनिव्ययवित्तगे भवति पापखगे मरणं नृणाम्॥९॥

---

१ वेष्टिता पा । २ गच्छति

CC-0. Nepal Sanskrit Academy, Kathmandu

दशमः सर्गः

साशोभनो रविसुतः शुभयोग दृष्टिर्वर्ज्यो यदा नवमगोऽत्रगदी विदेशे
मृत्युस्थितेत्विहमृतिस्तनुगे तु चन्द्रे धर्मद्युतौ मदनगे मृतिमेति रोगी ॥१०॥

विनाशनाथो यदि कण्टके स्याद्वपुः पति र्द्वादशगोऽरिगो वा ।
मृतिस्तदा स्यादथपापदृष्टे शरीरनाथे मृतिगे मृतिः स्यात् ॥११॥

अस्तमिते तनुनाथेऽभ्युदिते रन्ध्रेश्वरे बलिनि ।
चन्द्रे षष्ठाष्टमगे म्रियतेरोगादितो नियतम् ॥१२॥

क्रूरास्तुर्यविनाशगा रिपुविनाशस्थो विधुश्चेन्मृति-
श्चन्द्रे तूदयगे कुजे नवमगेरिष्फे शनौ नैधने ।
भानौ, स्यान्मरणं यदा न बलवाञ्जीवोऽथ दुश्चिक्यगः
षष्ठो वा रविरम्बरे तु शशभृत्स्यात्पञ्चताऽल्पैर्दिनैः ॥१३॥

पापग्रहा यदि तनौ नवपञ्चमे वा स्याद्द्वाशरैर्दशभिरष्टभिरत्रमृत्युः ।
जामित्रगे धनुषि वा मिथुने यदा स्युः पापास्तदा भवति रोगचयोऽथमृत्युः
॥१४॥

अथ दोषज्ञानम्

क्षेत्राधिपस्य दोषो भानौ रन्ध्रान्त्यलग्नगे भवति ।
चन्द्रे लग्नारातिव्ययमृतिगे गगनदेवीनाम् ॥१५॥

शाकिन्याव्ययकर्मगेऽवनिसुते, चान्द्रौ व्ययद्यूनगे ।
दोषोऽरण्यसुरी भवोऽथधिषणे कामान्त्यगे देवजः ।
शुक्रे मन्मथरिष्फगे जलसुरी दोषः स्मरान्त्यस्थिते
पङ्गौ व्यन्तररुग् विनाशसहिते क्रूरैर्भवेत्कर्मणाम् १६॥

यक्षक्षेत्रज पूर्वजोद्भवरुजो भानौ विनाशान्त्यगे
शाकिन्या रजनीश्वरे वसु[१]मतीतुत्रे भवेत्पूर्वजः ।
चान्द्रौ भूतभवः पूरन्दरपुरोधस्यात्मपित्रादिजो
दैत्यार्चेऽम्बरमाश्रिते रविसुते स्याद्गोत्रदेवी भवः ॥१७॥

---

[१] भौमे ।

CC-0. Nepal Sanskrit Academy, Kathmandu

संवित्प्रकाशकाव्य

पापे वैरि पराक्रमव्ययतपोनिष्ठेऽम्बुशस्त्रद्रुम-
व्यालोद्बन्धनवन्हिदुर्मतिमृतिप्रोद्भूतदोषोदयः ।
सूर्ये ऽत्र ज्वरतो मृतिर्भृगुसुतेन्द्वोः स्यादतीसारतः
पङ्गौ वारित इन्दुजेऽत्र कफतःशस्त्रात्तु राह्वारयोः ॥१८॥

लग्नद्यूनगतेऽर्के तातो दोषाय, लाभगेऽत्र सुतः ।
भ्राता राहौ व्ययरिगे द्वयष्टमगे मङ्गले पितुर्भ्राताः ॥१९॥

पितृव्यकाङ्गनादोषः शशिजे निधनस्थिते ।
क्रोडेऽम्बया अथो क्रोड़े व्यन्तरस्य व्ययास्तगे ॥२०॥

वैद्यो विलग्नमगदोहिबुकं गदी स्त्री कर्मोपधीह सदस द्युति भावि वाच्यम् ।
पापे तनौ भिषगुपक्रमनिस्फलत्वं सौम्यन्यथा दशमगेत्वशुभे गदर्द्धि ॥२१॥

कान्हकवीश्वरनन्दन गोविन्दकवीश्वरेण विनीते ।
संवित्प्रकाशकाव्ये दशमः सर्गो गदि प्रश्ने ॥२०॥

नष्टवस्तुप्रश्ने

द्यूननाथो भवेच्चौरो लग्नपो नष्टवस्तुपः ।
नष्टवस्तु न चेन्द्रर्कौ तस्मात्तेभ्यो हि तत्फलम् ॥१॥

तनुतनुपतिचन्द्राः पृच्छकार्थं विलोक्याः ।
स्मरमदनपती द्वौ तस्करार्थं निरीक्ष्यौ
दशममभिविलोक्यं विस्मृतापेत हेतो-
रिह हितमहितत्वं यत्र तत्सिद्धयसिद्धी ॥२॥

पापः पश्यति मन्मथोदयपती चेत्तत्र यद्विस्मृतं
नष्टं तत्किल लभ्यतेऽथहिमगुस्थानेश्वरश्चेद्विधुम् ।
पश्येत्तर्ह्यपि विस्मृतादि सुलभं पूर्णस्तु चन्द्रस्तनौ
दृष्टो वाक्पतिना तदापि सुलभं यद्विस्मृता वा गतम ॥३॥

CC-0. Nepal Sanskrit Academy, Kathmandu

एकादशः सर्गः

सौम्याः [1]पुण्यविलग्नगा यदि तनूद्यूनस्थिताः पापकाः
तर्हि स्वल्पमवाप्यते गतमथो पातालतो वा तनोः ।
सौम्या विक्रमवित्तगा यदि तदा नष्टाप्तिरर्थाधिपः
चेत्सूर्याच्चलितो भवेत्समुदितो लभ्येत तत्राल्पकम् ॥४॥

मिथुनतुरगसिंहमीना येते शुभाढ्या नभसि यदि गतार्थावाप्तिरारोग्यमत्र ।
बुधगुरुकवयश्चेत् कण्टकस्थास्तदानीमपगतं वसुलाभः स्यात्तथाऽन्यस्य-
लाभः ॥५॥

त्यक्त्वा मन्मथनाथमत्रितनयोद्भूतस्तनुस्वामिना
युक्तश्चेदिहलभ्यते गतवसु प्रायः परप्रार्थनात् ।
लग्नेशेऽस्तपतीक्षिते हृतधनं प्राप्येत कष्टादथो
केन्द्रे पापयुतोऽस्तपो भवति चौराप्त्यै शुभाढ्योऽन्या ॥६॥

लग्ने लग्नकलत्रपौ गतधनप्राप्त्यै भवेतां तनौ
कामस्वामिनि कष्टतोऽथ तनुपे कामस्थिते नाप्यते ।
लभ्येतेन्दुयुते रवौ मदनगे नष्टं च शीर्षोदये
पुष्टे रात्रिपतौ शुभे चशुभ संदृष्टे विनष्टाप्तयः ॥७॥

लाभस्तो बलवान् शुभो वितनुते नष्टार्थलाभं शुभा
पातालारिपराक्रमात्मजकुटुम्बेषु स्थिताश्चेतदा ।
नष्टार्थाप्तिकरा भवन्ति नियतं तेष्वेव चेत्संस्थिताः
पापास्तर्हि विनष्टविस्मृतवसुप्राप्तिर्नसंभाव्यते ॥८॥

क्रूरेक्षितान्विधौतवि हृतवस्तुचौरान्नश्येदथो मदनपेऽतिविनष्टरुपे ।
चौरो विनाशमुपयाति यदास्तनाथः स्याद्वक्रितो भवति तर्हि न नष्टलाभ
॥९॥

पापाः केन्द्रं कुटुम्बविक्रमगताश्चेन्नष्टलाभो न हि
स्यान्नैवार्थसमृद्धिरत्र न जयः किञ्चिच्चनश्येत्परम् ।
द्यूनेशे रविराशिगे सतितनुस्वामी न पश्येद्यदा
चौरस्वीकृत वस्तु नैव कथमप्याप्येत तत्र क्वचित् ॥१०॥

कुटुम्बाधीशलग्नेशौ यदि लग्नं प्रपश्यतः ।
तदा तष्करमुष्णार्थलाभवार्तापि दुर्लभा ॥११॥

---

१ पण्यः पा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

संवित्प्रकाशकाव्यम्

शीतभानूष्णभानुभ्यां दृष्टे लग्ने गृहा[1]श्रयी ।
भवेच्चौरोऽत्र योगे तु चरे लग्नेऽन्तिकालयः ॥१२॥

चन्द्रार्कौ परराशिगौ तनुपतिं मूर्तिं च चेत्पश्यतः
चौर स्तर्हि निजैः सहैव विचरेत्तौ चेत्स्वराशिस्थितौ ।
पश्येतामुदयं तदा गृहजन श्चौरोऽथ तौ पश्यतो
लग्नं चेद्द्वितनुस्थितावि‌ह भवेच्चौरः स्वकीयोजनः ॥१३॥

जायेशो यदि रिष्फगो धनगतो वा तर्हि भृत्यो भवेत्
चौरोऽसौ निजगेहगौ यदि तदा स्यात्तस्करो विश्रुतः ।
तुङ्गेऽसौ यदि नायको हरऽह स्याद्वा तदीयप्रसू—
स्तैन्यायोद्यमभागथो मदनपे सूर्ये पिता तस्करः ॥१४॥

कामेशे धिषणे हरो[2]गृहपतिः काव्यऽस्तपे गेहिनी
स्तेना स्यादधिकारिणी मदनपे विश्वम्भराजन्मनि ।
भ्राता वा तनयो हरो निगदितो ज़ामित्रगे सोमजे
मित्रं वा स्वजनो हरो भृतिकरस्त्यर्कात्मजे द्यूनपे ॥१५॥

लग्ने स्थिरांशे स्थिरभेऽथवा तद्वर्गोत्तमांशे स्वजनेन मुष्टिम् ।
तत्रैव तत्स्यादथलग्नरामभागैः क्रमाद्द्वारि गृहान्तरे च ॥१६॥

केन्द्रस्थखेटैरथ लग्नतो दिग्वाच्याथ लग्ने प्रथमंनवांशात् ।
विहाय पञ्चाथ परो नवांशो यत्संख्य एतत्समयोजनानि ॥१७॥

द्रव्यं लग्ननवांशकादिह वदेच्चौरान् विलग्नोपग—
द्रेष्काणादथवा द्रुकाणकपतेर्व्यादथोलग्नतः ।
देशाशासमयान्वदेदथ वयो जाति स्वरूपाकृति
व्यापाराचरणादि चौरत[3]नुगं ज्ञेयं विलग्नाधिपात् ॥१८॥

---

१ गृहाश्रमी इत्यपि पाठः । २ हरश्चौरे ,महेश्वारे । ३ चिन्त्यभिम्

CC-0. Nepal Sanskrit Academy, Kathmandu

द्वादशः सर्गः

यद्वा चन्द्रादेव दिक्कीर्तनीया यद्वा प्राची दिग्भवेदग्नि[1]राशौ ।
अम्भोराशावुत्तराभूमिराशौ याम्याज्ञेया वारुणी वायुराशौ ॥१९॥

पश्येद्रविर्दशमगं गुरूमत्र रूप्यं नष्टं शशी निजगृहांशगतोऽपि रौप्यम् ।
मूर्द्धाहिमीज्यरजनीशयुते वृषेतु वस्त्रादि शोभनतरं मिथुने तु कुप्यम् ॥२०॥

मिथुने वा मिथुनांशे स्थित्वा पङ्क्तुर्यदेक्षते लग्नम् ।
विविधंवस्तु तदानीं विज्ञातव्यं हृतं चौरैः ॥२॥

कान्हकवीश्वरनन्दनगोविन्द कवीश्वरेण निर्णीते ।
संवित्प्रकाशकाव्ये शिवसंख्यो मुष्टिविसर्ग एकादशः ॥११॥

अथ नौः प्रश्नः

लग्नं नावो वदनं दशमं कूपः[2]स्मरस्तु[3]सुकाणम् ।
तुर्यं पढाण[4]माहुरेषुफलं सदसदाश्रितगृहतः ॥१॥

पश्येल्लग्नपतिर्लग्नरंध्रे चन्द्रेज्यभार्गवाः ।
उच्चे लग्ने शुभैर्दृष्टे भवेल्लाभस्तरीभवः ॥२॥

दशमे भौमे वह्नि विद्युत्पातादितो भवेद्भङ्गः ।
पोतस्याथ चतुर्थे भौमे वन्हिर्दहेदधः किमपि ॥३॥

नरराशौ भूमिसुते चौरेऽरित[5]वन्हितो भयं पोते
भौमशनी वक्रस्थौ भवतो नौ वक्रभंगाय ॥४॥

---

१ मेष स्तौक्षिकपञ्चास्या विज्ञेया वन्हिराशयः । वृषपाथोनमकरास्युरेते भूमिराशयः ॥ मिथुनं च तुला कुम्भ राशयः पवनात्मकाः । कर्कवृश्चिकमीनास्तु विज्ञातव्या जलात्मका इतिबुद्धिविलासिन्याम् ।
२ कूपोगुण वृक्ष नौमध्यगत काष्ठः । ३ सुकाणं च सुगाणं च सुष्काणं च सुकाणकम् सुङ्काणं वा पुरोवर्त्यग्रयुक्तमिति । ४ पढाणं वहना इतिलोके (पतवार) ५ चौराद्वन्हितो भयं पा: ।

CC-0. Nepal Sanskrit Academy, Kathmandu

संवित्प्रकाशाख्यम्

लग्नेशाश्रितराशिस्वामी चेद्वक्रितोऽथ लग्नेशः ।
वक्रीस्यात्तर्हितरी व्यावृत्याऽभ्येति नियमेन ॥५॥

यौगेऽत्रैव विज्ञेयो[1] लग्नेशे सौम्य वीक्षिते सहिता ॥
वस्तुभिरायाति तरी पापैर्दृष्टे च वस्तुभि स्त्यक्त्वा ॥६॥

मृत्युपश्चन्द्रराशीशं[1] चन्द्रं लग्नेश्वरं तथा ।
यदि क्रूरदृशा पश्येन्नश्येत्पत्या सहैव नौः ॥७॥

दक्षिणभागो नाथो धनधीदुश्चिक्यर्हिबुक भवनानि ।
वामो भागो नवमव्ययलाभाकाश गेहानि ॥८॥

एषु शुभाशुभ योगाच्छुभमशुभं वा वदेद्यानं ।
वामे गमनावसरे दक्षिण भागे परावृत्तौ ॥९॥

लग्नेशो हिबुकेशदृष्ट सहितो लग्नाम्बुगश्चेत्तदा
नौरायाति झटित्यथो बहुबलः कर्मस्थितो वाक्पतिः ।
पश्येद्दैत्यगुरुं तनुं च तनुप स्तर्ह्येति नौः धीर्यवां
श्चन्द्रः पश्यति चेन्निवृत्ति भवनं नौरेति लाभ प्रदा ॥१०॥

मार्गपः शुभ संदृष्टो लग्नपः सूर्यवीक्षितः ।
कुशलेन तदायाति तरी वैरि करादपि ॥११॥

अचिरान्नौ समायाति लग्नपेन्दू चरे यदि ।
स्थिरे तौ, चेद्द्विलम्बेन द्विस्वभावे विमिश्रितम् ॥१२॥

मरणं धर[2]णं नौश्च त्रयस्य सदृथं फलम् ।
कथितं विबुधैस्तेन मृत्युयोगान् निरीक्षयेत् ॥१३॥

मृत्युयोगे समायाति कुशले न तरी गृहम् ।
बद्धो झटिति मुच्येत रोगी मरणमाप्नुयात् ॥१४॥

---

१ विशेषो पा । २ धरणं बन्धने मान प्रभेदे धारणेऽपि चेति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

द्वादशः सर्गः

कर्माधिपे मदनरिष्फ गतेऽन्य देशे
स्यान्नौ रिहाम्बरपतौ परिपश्यति स्यात् ।
अल्पव्ययोऽथ मृतिरिष्फगतेऽरिनाथे
दुश्चिक्यगे गगनपे परिपन्थिनी नौ ॥१५॥

क्षिणेन्द्वीक्षिततुर्यनाथरबिजे पोते भवेच्चौरभीः
कर्मेशस्त्वशुभान्वितो यदि नभः स्यात्पाप संवीक्षितम् ।
भंगःकूपमुपैति तत्र तु भवेद्भंगः पढाणस्य वा
ऽथो पापद्वयभुङ् नभः परि वृढो व्र्ते शिढस्यात्ययम् ॥१६।

दुश्चिक्यपो रविसुतोऽशुभ युक्तदृष्टो नावि प्रधान पुरुषं कुरूते सरोगम् ।
छायासुतस्तु निधनस्थित इन्दुदृष्ट शुंकाणकादि ही भनक्तितरीविनाशी
॥१७॥

कर्मलग्नं यदा दृष्टं काव्येन रजनीश्वरे ।
वीक्षिते हिबुकेशेन पोतभङ्गोऽम्बुधौ भवेत् ॥१८॥

भौम दृष्टो भवेत्क्रूरः कर्मनाथोऽर्कजस्तुचेत् ।
तुर्यस्थो वीक्षते तुंग पढाणं स्थलगं तदा ॥१९॥

शनिर्यदा शुभैर्दृष्टो युक्तो वा सम्भवेदिह ।
स्थलादपि पढाणं तत्कुशलेनाऽऽगमिस्यति ॥२०॥

मीनं कविः पश्यति भान्तगेन्दु स्तुर्याधिपः पश्यति मंत्र गेहम् ।
व्ययाधिपश्चे द्व्ययगो व्ययं वा पश्येत्तदा वारिणि पोतभङ्गः ॥२१॥

शनैश्चरं मृत्युगत दिनेशो विलोकिते वा पृथिवीतनूजः ।
एकांशतः प्रान्त्यगतौ यदा स्यात्तदा तटे पोत विनाशनाहुः ॥२२॥

कूचरं नाशयेत्पापैर्युक्तो दृष्टोथवाऽस्तपः ।
नवमस्थस्तु चन्द्रार्क वीक्षितः परदेशगः ॥२३॥

CC-0. Nepal Sanskrit Academy, Kathmandu

संवित्प्रकाशकाव्यम्

तृतीयगो मंत्रपतिर्महीजं विलोकयेच्चन्द्रतनूजयुक्तम् ।
विलग्नपः पश्यति चेद्विलग्नं तरीप्रवासः कथितस्तदानीम् ॥२४॥

रिपुगृहे निधने नवमाधिपो भवति नीचगतोऽस्तमितोऽपिवा ।
यदि तदा वद लाभमिहाल्पकं लभत एव फलापगमो न तु ॥२५॥

विलोकमाने तनुपे शरीरं रन्ध्राधिपे रन्ध्रमनीक्षमाणे ।
वारांनिधौ मज्जतियानमेव वदन्त्यदस्ताजिकतन्त्रदक्षाः ॥२६॥

निधनाधीशोदयपौ भवतो लग्नाश्रितावुभौ तर्हि ।
कृत्वा वाऽऽपणिकाद्यं समुपैति तरी निजागारम् ॥२७॥

स्थिरोदये जीवनिरीक्षिते स्यात्तरीप्रवासोऽथ यदा विलग्नम् ।
पश्येत्त्रिकोणाधिपमध्य[1]नाथः पापेक्षित स्तर्ह्यपि नौप्रवासः ॥२८॥

तरी समायाति शनीन्दुदृष्टे द्यूनेऽथ कामे रिपुमन्ददृष्टे ।
युद्धं पथिस्याद्यदि पश्यतोऽस्तं जीवेन्दुजौ तर्हि रणाभिवृद्धिः ॥२९॥

उदयं पश्यत्यर्के मंदेन निरीक्षिते युते वापि ।
लग्नपतिर्यदि पश्येद्यवना श्चौरैर्मुष्टान्तरीमाहुः ॥३०॥

उदयाधीश्वरमुदयं पश्यति रंध्रं च रंध्रनाथश्चेत् ।
तर्हि निमज्जति न तरी जलधौ लाभश्च चिन्तितो भवति ॥३१॥

अस्तमिते लग्नपतावुदयेहिबुके नैधने वापि ।
पृच्छायां यदि पापाः पोतपतेरत्र पञ्चत्वम् ॥३२॥

नेक्षते लग्नपो लग्नं रन्ध्रं नेक्षेत रन्ध्रपः ।
यदि तर्हि भवेन्नूनं पोतमज्जनमम्बुधौ ॥३३॥

रन्ध्रपोदयपौरन्ध्रे नीचेवा यदि तिष्ठतः ।
नवमेशेऽपि नीचे चेल्लाभो नैव भवेदिह ॥३४॥

---

१ चिन्त्यमिदम्

CC-0. Nepal Sanskrit Academy, Kathmandu

त्रयोदशः सर्गः

तनुपस्तनुमीक्षते गुरुर्यदि रन्ध्रे बहुलाभसंपदः ।
सबले तनुपे च भार्गवे निधने पापविवर्जिते फलम् ॥३५॥

उदयाष्टमगैः शुभग्रहैः नरराशौ सबले विलग्नगे ।
बहुलाऽहलाभसंपदः परदेशा हृतवस्तुसंभवाः ॥३६॥

कान्हकवीश्वरनन्दनगोविन्दकवीश्वरेण निर्णीते ।
संवित्प्रकाशकाव्ये सर्गोऽयं द्वादशो नावि ॥१२॥

अथ क्रयविक्रयः ।

क्रेता लग्नपतिर्मतो यदि भवेल्लग्नं बलाढ्यं तदा,
ग्राह्यं वस्तु भवेदिहातिशयितो लाभोऽथ लाभेश्वरः ।
विक्रेताऽभिमतोऽथ लाभभवनं चेत्स्याद्बलाढ्यं तदा,
विक्रेतव्यमिदं त्वयेति कथयेल्लाभो भवेद्विक्रयात् ॥१॥

विलग्नभे वीर्ययुते समर्घं बलेनहीने तनुपे[1] महर्घम् ।
महर्घता वित्तपतौ बलाढ्ये समर्घता निर्बलवित्तनाथे ॥२॥

पश्येल्लग्नपतिं यदा तनुगृहं ग्राह्यं तदा, व्यत्यये
न ग्राह्यं, बलवांस्तु यावदुदयस्तावत्समर्घं वदेत् ।
यावल्लग्नगृहं बलेनरहितं तावन्महर्घं मतं
लग्नं चेच्छुभनाथवीक्षितयुतं ज्ञेयं बलाढ्यं हितत् ॥३॥

तच्चापि प्रबलं विलग्नमुदितं केन्द्राणि पश्यद्ग्रहैः
सौम्यैर्युक्तनिरीक्षितानि विपरीतत्वे तु तन्निर्बलम् ।
किञ्च स्वामिबले बलाढ्यमुदितं लग्नं यदा निर्बलो-
लग्नेशोऽत्र विलग्नसंस्थितबलाधिक्ये तदिष्टं बलम् ॥४॥

---

१ तनुभे इत्यपिपाठः

CC-0. Nepal Sanskrit Academy, Kathmandu

संवित्प्रकाशकाव्यम्

ज्ञेया वस्तु महर्घताऽतिबलिनौ चेल्लाभलाभेश्वरौ
तौ चेत्स्तो बलवर्जिताविह समर्घत्वं भवेद्वस्तुनः।
मित्र[1]त्वे समता यदा तु सवितुः स्यात्पूर्वसंक्रान्तितः
संक्रान्तिस्त्रि[2]मिते दिने श्रुतिमितेऽधिष्ण्ये समर्घं तदा ॥५॥

यदि तु संक्रमणं सवितुर्भवेत्प्रथमसंक्रमत स्तृतियोऽहनि ।
भवति पञ्चमकेऽथ च[3]तुर्थके दिवसके कथिता च महर्घता ॥६॥

तद्वर्षलग्नं यल्लग्ने मीनान्मेषं व्रज्रेद्रविः ।
मेष संक्रमणादग्रे यामाद्यास्या थ पौर्णिमा ॥७॥

तत्प्र[4]वेशविलग्नस्य नाथो वर्षविलग्नपः ।
उभौ केन्द्र गतौ स्तश्चेच्छुभ दृष्टौ तदा भवेत् ॥८।

स्वकीयराशिवस्तूनां महर्घत्वमसंशयम् ।
क्रूरदृष्टौ यदातौस्याद्राशिवस्तु महर्घता ॥९॥

चन्द्रार्कौ केन्द्रगौ सौम्य दृष्टौ व्रूतः समर्घताम् ।
सुवर्ण रौप्ययो स्तौ तु यदापणफरस्थितौ ॥१०॥

क्रूरदृष्टौ यदाब्रूतः स्वर्णरौप्यमहर्घताम् ।
शुक्रोऽत्र शशिवज्ज्ञेयो भानुवच्चन्द्रनन्दनः ॥११॥

जघन्यं रुद्रशक्राहिवरुणान्तकवायुभम् ।
ध्रुवद्विदैवतादित्यं बृहदन्यत्समं मतम् ॥१२॥

बृहत्स्वभ्युदिते चन्द्रे भवेद्धान्यसमर्घता ।
जघन्ये तन्महर्घत्वं समेतत्समता मता ॥१३॥

१मिश्रत्वे इत्यपि पाठः । २ यस्मिन्मासे पूर्वसंक्रान्ति स्तद्वासरात्तृतीये वासरे प्राक्संक्रान्तिकालिकं यद्भं तस्माच्चतुर्थं नक्षत्रं चे त्तस्मिन्सौरे मासि समर्घं भवेत् । यदि पूर्व संक्रातिवासराच्चतुर्थे वासरे प्राक् संक्रान्ति कालिकाद्भात्तृतीयं वा पञ्चमं नक्षत्रं चेत्तन्मासि महर्घता भवेत् । अनयो-र्भिन्ने समत्वमित्यर्थात्सिद्धम । ३ अमान्ते पूर्णान्ते काले च यद्विलग्नं तदधिपतिरित्यर्थः । ४ अत्र तद्विराम विलग्नस्येति पाठः साधुः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

त्रयोदशः सर्गः

मुहर्ताः पञ्चभूतुल्या जघन्यानां पराभिधा ।
वृहतां पञ्चवेदा ४५ स्ते समानान्ते खवन्ययः ३० ॥१४॥

पञ्चेन्दुषु मुहूर्तेषु दुर्भिक्षं रविसंक्रमे ।
पञ्चाब्धिषु समर्घं स्यात्त्रिंशत्सु समता मता ॥१५॥

पूर्णिमा१मासनक्षत्राद्यदिहीना समाधिका ।
समर्घत्वं समार्घत्वं महर्घत्वं क्रमात्तथा ॥१६॥

अमावास्यार्कवारेण युक्ता कुर्यान्महर्घताम् ॥
यत्र मासेऽर्कवाराः पञ्च तत्रापि नो शुभम् ॥१७॥

स्वामी भानुः स्नेहगंधांभसां स्यात्प्रालेयांसुर्नायकः स्याद्रसानाम् ।
रक्तान्नानां भूमिजः शूकधान्य स्वामी प्रोक्तो रौहिणीशः प्रसूतः ॥१८॥

सिद्धार्थ गांधूमयवेक्षुशालिप्रभुर्गुरुधान्यपतिस्तु शुक्रः ।
तिलादि कंग्वादिककोद्रवादियवादिनाथः कथितोऽर्कपुत्रः ॥१९॥

भानोर्वृश्चिकवृषभप्रवेशकाले मता योगाः ।
ग्रैष्मिकशोरदधान्यप्रवृद्धयेतानहं वक्ष्मि ॥२०॥

अलिप्रवेशे तपनस्य तस्मात्केन्द्रेषु सौम्यग्रहसंयुतेषु ।
पुष्टेषु वीर्यान्वितशोभनैर्वा विवर्द्धते ग्रैष्मिकसस्यसंघः ॥२१॥

गतवति वृश्चिकमर्के गुरूचन्द्रमसौ यदा कुम्भे ।
हरिकलशोपगतौ वा ग्रैष्मिक सस्यं विवर्द्धते तत्र ॥२२॥

---

१ उदाहरणं वैशाखी पूर्णिमा स्वाती युक्ता चेत्समर्घत्वं, विशाखायुक्ता चेत् समार्घत्वं, अनुराधायुक्ता चेत्महर्घत्वमेवं सर्वत्र।

२ सौरे वा चान्द्रे वेति शंकायाममान्तमानेन रवियुक्तामायन्मासे तत्र पञ्चार्कवाराः सुतरामतः पुनरुक्तिभिया सौरो मासो ग्राह्योऽनभिज्ञानाम् अपि शब्दोपादानादमायां सोमवासर भौमवासरसद्भावेऽपि पञ्चार्क-वाराः संभवन्ति, अतस्तदप्यशुभमित्यतो न पुनरुक्तिः।

CC-0. Nepal Sanskrit Academy, Kathmandu

संवित्प्रकाशकाव्य

अलिगत सवितुर्धनभे शशिजे शुक्रेऽथवा तत्र ।
रिष्फगशुक्रविदो वा सस्यर्द्धि गुरुद्वशात्यर्थम् ॥२३॥

वृश्चिक मुखगादर्कादिभृगुनन्दनचन्द्रसंभूतैः ।
लाभचतुर्थार्थगतैः कर्मणि जीवे च सस्यसंपत्तिः ॥२४॥

अलिमुखनिष्ठे भानौ कुम्भे जीवः शशी वृषभे ।
मकरे भूमिज पङ्गू सस्यर्द्धी रोगवैरिचक्रादि ॥२५॥

अलिमुखगोऽर्कः पापद्वयमध्यगतो विनाशयेत्सस्यम् ।
जातं जातं सस्यं सप्तमगो नाशयेत्पापः ॥२६॥

भानो रलि वदनस्थात्कण्टकजामित्रसंस्थितौ पापौ ।
कुरुतः सस्यविनाशं सौम्यैरवलोकितौ न सर्वत्र ॥२७॥

वृश्चिकघकृगसूर्याद्रिपुकाम गतावशोभनौ तर्हि
सस्यानामधिकर्द्धि भवति तथा हानिरर्थस्य[1] ॥२८॥

वृषभप्रवेशसमये सविता विधिना पूर्वोदितेनैव ।
शारदधान्यसमृद्धिहासौ तनुते न संदेह ॥२९॥

मिथुनस्थे भृगुपुत्रे विधुना पूर्वोदितेनैव ।
वर्षाकाले सलिलं विज्ञातव्यं बलाबलज्ञेन ॥३०॥

मेषादिराशित्रयगो दिनेशश्चरन् शुभैर्युक्त उताभिदृष्टः ।
ग्रीष्मोत्थ धान्यं कुरुते समर्घं सुखोपयोगं गतसाध्वनश्च[2] ॥३१॥

धनुरादित्रितयेऽर्क स्तद्वत्कुर्वीत शारदं धान्यम् ।
ज्ञेयः संग्रहकाले विपर्ययः क्रूरदृग्योगात् ॥३२॥

द्रव्यस्य यस्य यस्येशो यो यो राशिः प्रकीर्तितः ।
शुभाशुभा वबोधाय सांप्रतं तमहं ब्रुवे ॥३३॥

कुतपाविकवस्त्रणां स्थलौषधिसुवर्णयोः ।
यवगोधूम शालीनां मसूरस्या थिपः क्रियः ॥३४॥

---

१ हानिर्मूल्यस्य पा । २ साध्वसंत चेत्यपि पाठः

CC-0. Nepal Sanskrit Academy, Kathmandu

त्रयोदशः सर्गः

वृषभोऽधिपतिर्ज्ञेयो वस्त्रस्य कुसुमस्य च ।
यवगोधूमशालीनां महिषानडुहोरपि ॥३५॥

शरत्कालीनवल्लीनां धान्यकार्पाशयो स्तथा ।
शालू[1]कस्य च कंदस्य मिथुनोऽधिपकीर्तितः ॥३६॥

कन्दपत्रफलादीनां कदलीमो[2]चयोरपि
काद्रवाणां च दुर्वाया कर्कराशिर्मतोऽधिपः ॥३७॥

रसानां तुषधान्यानां सिंहादीनां त्वचामपि ।
गुडस्य च पतिं प्राहु र्मृगराजं मनीषिणः ॥३८॥

गोधूमानां च मुद्गानां निः[3]पावक कुलत्थयोः ।
कलायानां च मत्स्यानां कन्याराशिः प्रभूर्मतः ॥३९॥

यवगोधूममाषाणां सर्षपाणां प्रभुस्तुला ।
अजाविकेक्षुलोहानां सैन्यानां वृश्चिको मतः ॥४०॥

धान्यानां च तिलानां च मूलानां लवणस्य च ।
तुरगाणां च शस्त्राणां धनुषि प्रभुता मता ॥४१॥

शाकेक्षुस्वर्णलोहानां गुल्मतर्वो मृगोऽधिपः ।
पुष्पवीजफलानेक रत्नानामधिपो घटः ॥४२॥

स्नेहानां मत्स्यजातीनां रत्नानामम्बुजन्मनाम् ।
कपालसम्भवानां च मीनः परिवृढो मतः ॥४३॥

राशेश्चतुर्थाय नभोमनोभू कुटुम्बपुण्यात्मजगः सुरेज्यः ।
कुटुम्बधीलाभविनाशगोज्ञ तद्राशिवस्तूनिनयेद्विवृद्धम् ॥४४॥

शुक्रस्मरेऽरौ च करोति हानी शेषेषु वृद्धि तनुतेऽथ पापाः
त्रिषड्दशायेषु विवृद्धिमेव वितन्वतेऽन्येषु गृहेषु हानिम् ॥४५॥

---

१ शालूकं कमलकन्दः । २ मोचाशाल्मलि रम्भयोरिति । ३ निष्पावः सूर्य पवने राजमाषेकडङ्गर. लोके खेशरीति

CC-0. Nepal Sanskrit Academy, Kathmandu

संवित्प्रकाशकाव्यम्

राशिनामिह एषां पीडास्थानेष्वपि स्थिताः पापाः ।
बलिनस्तद्द्रव्याणां दुर्लभता तन्महर्घत्वम् ॥४६॥

यद्राशीनामीष्टस्थाने सौम्याऽवस्थिता बलिनः ।
तद्द्रव्याणांज्ञेयं सुलभत्वं वृद्धिसामर्घ्ये ॥४७॥

गोचरपीडास्वपि यो राशिर्दृष्टः शुभैर्बलिभिः ।
तनुते न तथा पीडां पापैरेवं विपर्ययो भवति ॥४८॥

इति द्रव्य निश्चयकथनम्

उत्पातानतिवृष्टि स्वण्डपरिवेषोश्योपरागादिकान्
दर्शेपञ्चदशीदिने च गणको दृष्ट्वानुमासंक्रमात् ।
तिग्मांशावज़पूर्वराशिषु यदेदर्घ प्रभेदान्मतान
भूपानां समराय तेऽन्यतिथिजोत्पाताः पुरावेदिभिः ॥४९॥

धान्यं ग्रैस्मिकमाहरेदजगते भानौ भवेल्लाभवान्
तुर्ये मासि वृषस्थितेऽत्र फलमूलाद्यं गृहीत्वा तथा ।
तिग्मांशौ मिथुनस्थितेसतिरसा न्सर्वान् गृहित्वा तथा
सस्यं लाभ मवाप्नुयादभिमतं मासैरसैः संमितैः ॥५०॥

कर्कस्थे मधुगंधफाणितघृतंतैलं गृहित्वाप्नुयात्
लाभं षष्टिदिनै र्द्विसंगुणमवाप्नोत्यन्यथा संक्षयम् ।
सिंहस्थे मणिचर्मघर्मरजत स्वर्णादिमुक्तायसं
नित्वा पञ्चममासि भूरिहि फलं छेदोऽन्य मासे मतः ॥५१॥

कन्यास्थेऽश्वखरोष्ट्र चामर मुपादायाप्नुयान्माशके
षष्ठे लाभफलं द्विसंगुणमथो भानौ स्तुलासंस्थिते ।
भाण्डं तांतवकं बलादि च मणिन् पीतादिपुष्पाणिवा
नीत्वा सस्यमवाप्नुयाद्द्विगुणितं लाभं समार्द्धे गते ॥५२॥

---

१ सूत्रम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

चतुर्दशः सर्गः

अर्के वृश्चिक संस्थिते सतिलकं कन्दं च मूलं मणिं
नीत्वाब्दद्वितये भवेद् द्विगुणितो लाभोऽथ चापस्थिते ।
सूर्ये कुंकुमशंखविद्रुमयुतं काचं च मुक्ताफलम्
नीत्वामासि रसैर्मिते द्विगुणितं लाभं भवेत्सञ्चितम् ॥५३॥

मृगघटगेऽर्के लोहं भाण्डं धान्यानि संगृह्य ।
मासेन द्विगुणः स्याल्लाभो लाभार्थिनां नियतम् ॥५४॥

यस्मिन् यस्मिन् राशौ तिग्ममयूखः शशी वापि ।
संगतोऽधिमित्र दृष्ट स्तस्मिन् लाभोऽयमाख्यातः ॥५५॥

मीनगतेऽर्के मूलं भाण्डं कंदफलं च रत्नानि ।
नीत्वा षष्ठेमासे विक्रेता लाभमाप्नोति ॥५६॥

शीतांशु स्तनुते मितेन समयेनार्घस्य वृद्धिं शुभां ।
पापैः संयुत वीक्षितोऽस्यतनुते हानिं तथैवोष्णगू ।
भावान् सर्व गृहेशु वीक्ष्य सदसद्रूपं फलं कीर्तयेत्
पूर्णो वा रविसंयुतः शुभखगैर्युक्तोऽथवा वीक्षितः ॥५७॥

काह्नकवीश्वरनन्दन गोविन्दकवीश्वरेण निर्णीते।
संवित्प्रकाशकाव्ये क्रयणादि विधि स्त्रयोदशः सर्गः ॥१३॥

विजयादिप्रश्नः

वादिनं जयति पापखेचरे लग्नगे नपुनरस्तनीचगे ।
लग्नकामसहितोऽशुभग्रहो वादिनो न कलहो निवर्तते ॥१॥

विहाय जामित्र तनू मिथश्चेत्क्रूर ग्रहौ पश्यत ऊर्द्ध दृष्ट्या ।
तदाऽऽशु वादि प्रतिपादिनौ तौ मिथः प्रहारं कुरुतोऽति दृप्तौ ॥२॥

---

१ जगतोऽधिनित्र पा. ।

CC-0. Nepal Sanskrit Academy, Kathmandu

सांवत्सरप्रकाशकाव्यम्

लग्नाधिपतिर्वादी प्रतिवादी कामगस्तयो र्यः स्यात् ।
अधिकबलोऽसौ विवलं प्राप्ते काले जयेदेव ॥३॥

लग्नेश्वरः शशधरोऽथ शुभेन युक्तः केन्द्रे भवेद्यदि तदा भवति प्रसिद्धा ।
सत्याजनश्रुतिरथो धनपः शुभो वा पुण्येऽस्ति तर्ह्यपि जनश्रुति-
रस्तिसत्या ॥४॥

मिलनस्य यदा पृच्छा तदा केन्द्रगतेऽस्तपे ।
स आसन्न पुरे ज्ञेयो मिलेदापोक्लिमे गते ॥५॥

मदनधनविनाशस्थायिनः पापखेटामरणकरणदक्षाः स्वाश्रयं नाशयन्ति ।
निगदितविधिसौम्या आश्रयाप्ति विदध्युविदधति सुखसंपत्प्राप्ति नीरोगते
च ॥६॥

धनभवनगतैः स्यात्पापिभिर्वित्तनाशो मदनगृहसमेतैर्विभ्रमं प्राहुरार्याः ।
निधनभ सहितैस्तैर्जायते पञ्चतादिस्तत इह न विदध्यात्सेवकः स्वामिसेवाम्
॥७॥

शीर्षोदये तनुगते सतिपृच्छकस्य पृष्ठोदये मदनगे भवति प्रभूतः ।
स्नेहोऽधिपेन विपरीतगतो यदि स्यादप्रीतिरेव पतिभिः सहसम्भवस्य ॥८॥

अथ दिनचर्या

चन्द्रः स्वोच्चशुभः स्वमित्रभवनस्थः सौम्यसंदेक्षितो
नीचारातिगृहारिरन्ध्र रहितः स्थानस्थितो हर्षितः ।
पुष्टो वैरिनिरीक्षितो खिलजयी चैत्रयात्समस्तं दिनम्
ज्ञेयोऽसौ दिवसो खिलोऽपि फलदः स्याद्वैपरित्येऽन्यथा ॥९॥

राहुर्वा भौमो वा क्रूरोग्रहोवाष्टमे स्वगृहे ।
स्वगृहांशे चन्द्रोपेतश्चेच्छस्त्रेण मृत्युदो भवति ॥१०॥

छिद्रे शुक्रेन्दू चेदतिसारः सूर्यभौमयोरस्त्रम् ।
जीवे दोषत्रितयं कुजभृग्वोः खलता शनौ रोगः ॥११॥

CC-0. Nepal Sanskrit Academy, Kathmandu

चतुर्दशः सर्गः

श्री गोविन्दकवीशमीशभजनात्प्राप्तं कवीशाग्रणी
श्रीमत्काह्नकविः सुतं प्रसुषुवे श्रीकर्मदेवीचयम्
वेदान्ताम्बुजभास्वतार्थबहुलं संवित्प्रकाशाभिधम्
काव्यं तेन कृतं समाप्तिमगमद्विद्वज्जना नन्ददम् ॥१२॥

इतिकान्हकवीश्वरनन्दन गोविन्दकवीश्वरेण निर्णीते।
संवित्प्रकाशकाव्ये यिजयादिवि[1]दा चतुर्दशः सर्गः ॥१४॥

समाप्तमिदं संवित्प्रकाशाख्य काव्यमिति।
भूभृद्द्विद्वनाग भूशाके पाञ्चलिङ्ग निवासिनः।
संवित्प्रकाशकाव्यं वै भूदेवोऽलिखन्निदम् ॥ ।

समाप्तम्

१ कवीश्वरेणेत्यनेन सहास्य सम्बन्ध

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy. Kathmandu

शुद्धिपत्रम्

अशुद्धम्	शुद्धम्	पृ. सं.	पं. सं
प्रकीर्णा	प्रकीर्णो	भूमिका	१
तेष्वेयं	तेष्वेदं	,,	७
प्रचारश्च	प्रचारञ्च	,,	१०

अनुक्रमणिकायाः शुद्धाशुद्धम्

पध्यान्हादि	मध्यान्हादि	१	८
सगः	सर्गः	२	१०
वशाद्	वशाद्	२	१३
ज्ञानन्	ज्ञानम्	३	३
सिद्धय	सिद्ध्य	३	११
रङ्गस्पशात्	रङ्गर्स्पशात्	३	१५
चतुथः सग	चतुर्थः सर्गः	३	१६
जायेशाद	जायेशाद्	३	२८
योमः	योगः	४	१६
दशनात्	दर्शनात्	४	२०
बहसतो	बहुसुतो	४	२१
ग्रहराशिवशात्	ग्रहराशिवशात्	५	२५
सञ्चारक्षात	सञ्चारर्क्षात्	६	११
तुयान्निधि	तुर्यान्निधि	६	१२
स्थानेशद्	स्थानेशवशाद्	७	१३
सगः	सर्गः	७	२०
इतियोगः	इत्तियोगः	८	६
ज्ञानन्	ज्ञानम्	८	११
ज्ञानन्	ज्ञानम्	८	१२
ज्ञान च	ज्ञानं च	८	२१
चौरर्मुषित	चौरैर्मुषित	८	२६
चार्यगत	चार्यमता	८	२६
सूर्यस्यालि	सूर्यस्यालि	९	१८
स्यालि	स्यालि	९	१९
कलहौघना	कलहैर्घिना	१०	३

CC-0. Nepal Sanskrit Academy, Kathmandu

प्रसिवादी	प्रतिवादी	१०	५
द्रोगोः मृत्यु	द्रोगान्मृत्यु	१०	१२
मखिलं	मखिल	१	३
वसता	वसतो	१	१७
विरूद्ध	विरुद्ध	१	२३
मूर्तिमूर्ति	मूर्तिर्मूर्ति	२	२
ईदृश	इदृशं	२	१२
शक	शक्र	२	१६
सूजितम्	सृजितम्	२	१८
मात्मायस्य	मात्मामयस्य	२	२४
ईति	इति	३	५
कुजा	कुजान्	३	२२
नीष्टानिन्य-ष्टानि	नीष्ठान्यनिष्टा-नी	५	३
चेतादृश	चेत्तादृशं	५	२०
जावचिन्ता	जीवचिन्ता	६	२
कुमारोज्ञा	कुमारोज्ञो	७	२३
द्योषिद्	द्योषिद्	७	२६
व्ययेमूलात्	व्ययमूलात्	७	२७
शतगू	शीतगू	८	२
भवेत	भवेत्	८	१६
वृद्विः	वृद्धिः	६	१
काकाव्यम्	काव्यम्	१०	१
तृतीथ	तृतीयः	११	१
श्रेष्ठीरामां	श्रेष्ठीरामा	१२	२१
गभभ्रंशः	गर्भभ्रशः	१३	२
सग	सर्गः	१७	१
गर्भविचारः	गर्भ विचारः	१६	१
खद्रशा	खगदृशा	२०	८
नागस्यात्	नास्यात्	२०	८
देवा तेषां	देवास्तेषां	२२	२२
प	पा	२२	२३

CC-0. Nepal Sanskrit Academy, Kathmandu

तघघ	तनघ	२४	१७
सर्ग	सर्गः	२५	१
क्रूर	क्रूरः	२५	६
चिन्यमिदम्	चिन्त्यमिदम्	२७	२४
केन्द्रेषु	केन्द्रेषु	२८	२३
केन्द्राधिपे	केन्द्राधिपे	२८	२४
द्वृष्तेर्योगे	द्वृष्टेर्योगे	३०	१२
ज्येष्ठाषु	ज्येष्ठाषु	३१	१०
र्वभिलान्वित	भिर्वलान्वित	३१	२०
क्रे: द्रे	केन्द्रे	३२	२२
बूर्णान्त	पूर्णान्त	३१	२८
सर्गा	सर्गो	३२	३
सग	सर्गः	३२	४
द्वृत्यषुतं	द्वृष्ट्ययुत	३२	८
स्वबहि	स्वं वहि	३२	१३
चक्रागमोः	चक्रागमो	३३	१७
निधि	निधिं	३३	३
नितर्तत	निघर्तते	३४	१७
घिबग्ने	घिलग्ने	३४	२०
स्थायीतुन-	यायीतु	३५	१०
यति मदनाधिपः	स्थायी तु मदनाधिपः		
घिनाशयति	घिनाशंयाति	३६	१६
कूरीशस्थौ	क्रूरांशस्थौ	३६	१६
सकूरौवकितो,	सक्रूरौवकितौ	३६	१७
कूराः	क्रूरा	३६	२२
सग	सर्गः	३६	१
कष्टाता	कष्टता	४०	२
घिकाला	घिबला	४०	१५
बारिन	घारित	४२	५
गतम	गतम्	४२	२४
ऽन्या	अन्यथा	४३	११

CC-0. Nepal Sanskrit Academy. Kathmandu

नष्टाथ	नष्टार्थं	४१	१६
सुपाप्ति	सुप्राप्ति	४३	१६
न्विधौतवि	न्वितविधौ	४३	२०
काव्य	काव्ये	४४	१२
महेश्वारे	महेश्वरे	४४	२४
चिन्त्यभिम	चिन्यमिदम्	४४	२४
काव्य	काव्यम्	५२	१
वक्त्रणां	वक्त्राणां	५२	२४
घूम	धूम	५२	२५
थिपः	धिपः	५२	२५
काद्रवाणां	कोद्रवाणां	५३	७
मधिपा	मधिपो	५३	१७
श्योपराज	त्कोपराग	५४	६
संगृन्ह	संगृह्य	५५	६
स्यात्समस्त	स्यात्समस्तं	५६	१६
बा	वा	५६	२१

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu

मुद्रकः— जगत् उद्धार प्रेस, नयाँ सडक काठमाडौं